लिट्–उवाह । ऊहतुः । ऊहुः ॥ उवहिथ, उवोढ । ऊहथुः । ऊह ॥ उवाह, उवह । ऊहिव । ऊहिम * ऊहे । ऊहाते इत्यादि * आशीर्लिङ्–उह्यात् । वक्षीष्ट ॥ लुट्–वोढा । वोढारौ इत्यादि *लुङ्–अवाक्षीत् । अवोढाम् । अवाक्षुः ॥ अवाक्षीः । अवोढम् । अवोढ ॥ अवाक्षम् । अवाक्ष्व । अवाक्ष्म ॥ अवोढाः अवक्षाताम् । अवक्षत ॥ अवोढाः । अवक्षाथाम् । अवोढ्वम् ॥ अवक्षि । अवक्ष्वहि । अवक्ष्महि * शेष पच के तुल्य हैं ॥

धनिनं श्रयन्ते दरिद्राः । भरते स्वकुटुम्बं जनः । धरति लोकं धर्मः । पाकं पचति सूदः । ईश्वरं भज । देवान् यजस्व । भारं वहति गर्दभः । प्रायः इसी प्रकार धातुपाठ में लिखे भ्वादिगणस्थ अन्य धातु भी जानो ॥

इतिउभयपदप्रकरम् । भ्वादिगणश्च समाप्तः ॥

अथ तिङन्ते अदादिगणप्रकरणम्

तत्र परस्मैपदिनः

५५–अद=भक्षण, खाना

अत्ति । अत्तः । अदन्ति ॥ अत्सि । अत्थः । अत्थ ॥ अद्मि । अद्वः । अद्मः ॥ अद्यात् अद्याताम् । अद्युः ॥ अद्याः । अद्यातम् । अद्यात ॥ अद्याम् । अद्याव ।

अद्याम * अत्तु, अत्तात् । अत्ताम् । अदन्तु ॥ अद्धि, अत्तात् । अत्तम् । अत्त ॥ अदानि । अदाव । अदाम * आदत् । आत्ताम् । आदन् ॥ आदः । आत्तम् । आत्त ॥ आदम् । आद्व । आद्म * लिट्-आद । आदतुः । आदुः ॥ आदिथ आदथुः । आद ॥ आद । आदिव । आदिम * अथवा—जघास । जक्षतुः । जक्षुः ॥ जघसिथ । जक्षथुः । जक्ष ॥ जघास, जघस । जक्षिव । जक्षिम * आशीर्लिङ्-अद्यात् । अद्यास्ताम् इत्यादि ॥ लुट्-अत्ता । अत्तारौ इत्यादि * लृट्—अत्स्यति * लृङ्-आत्स्यत् * लुङ्-अघसत् । अघसताम् । अघसन् ॥ अघसः । अघसतम् । अघसत ॥ अघसम् । अघसाव । अघसाम ॥

५८—हन्=हिंसा, मारना, अघ करना और गति

हन्ति हतः घ्नन्ति । हंमि हथः हथ । हन्मि हन्वः हन्मः*हन्यात् । हन्याताम् इत्यादि * हन्तु, हतात् । हताम् । घ्नन्तु ॥ जहि, हतात् । हतम् । हत ॥ हनानि । हनाव । हनाम * अहन् अहताम् अघ्नन् । अहन् अहतम् अहत । अहनम् अहन्व अहन्म * जघान जघ्नतुः जघ्नुः । जघनिथ, जघन्थ । जघ्नथुः । जघ्न । जघान, जघन । जघ्निव । जघ्निम * वध्यात् इत्यादि * हन्ता * हनिष्यति * अहनिष्यत् * अवधीत् इत्यादि ॥

५७—यु=मिलाना और पृथक् करना

यौति युतः युवन्ति । यौषि युथः युथ । यौमि युवः युमः*युयात् इत्यादि * यौतु, युतात् । युताम् । युवन्तु ॥ युहि, युतात् । युतम् । युत ॥ यवानि । यवाव । यवाम * अयौत् अयुताम् अयुवन् । अयौः अयुतम् अयुत । अयवम् अयुव अयुम * युयाव युयुवतुः युयुवुः । युयविथ युयुवथुः युयुव । युयाव, युयव युयुविव युयुविम * यूयात् इत्यादि * यविता इत्यादि * यविष्यति इत्यादि * अयविष्यत् इत्यादि * अयावीत् इत्यादि ॥

५८—या=यान, जाना, पहुंचना, पाना

याति यातः इत्यादि * यायात् * यातु * अयात् । अयाताम् । अयुः, अयान् । इत्यादि*ययौ ययतुः ययुः ॥ ययिथ, ययाथ ययथुः यय ॥ ययौ ययिव ययिम * यायात् यायास्ताम्*याता*यास्यति*अयास्यत् * अयासीत् इत्यादि॥

५९—वा=गति, गन्धन, बूकरना ॥ ६०—भा=चमकना, प्रकाश ॥ ६१=स्ना=स्नान, न्हाना ॥ आशीर्लिङ्—स्नायात्,

स्नेयात् ॥ ६२–घ्रा=पकाना ॥ घ्रायात्, घ्रेयात् ॥ ६३–द्रा=बुरी चाल चलना ॥ द्रायात्, द्रेयात् ॥ ६४–प्सा=भक्षण, खाना ॥ प्सायात्, प्सेयात् ॥ ६५–रा=देना ॥ ६६–ला=लेना ॥ ६७–दा (पू)=काटना । ६८–ख्या=कहना, बोलना ॥ ख्यायात्, ख्येयात् । इन धातुओं के शेष रूप भी "५८–या" के तुल्य हैं ॥

अन्नमत्ति । शत्रुं हन्ति । दुग्धं मिष्टं च यौति । ग्रामं याति । वायुर्वाति । सूर्यो भाति । ब्राह्मणः स्नाति । सूपं घ्राति पाचकः । द्राति घूर्तः । प्साति मृगं व्याघ्रः । धनं राति, लाति वा । दात्रि धान्यं क्षेत्रे कृषकाः । ख्याति धर्मं गुरुः शिष्याय ॥

६९–विदृ=ज्ञान, जानना

लट्–वेत्ति वित्तः विदन्ति । वेत्सि वित्थः वित्थ । वेद्मि विद्वः विद्मः ॥ अथवा–वेद विदतुः विदुः । वेत्थ विदथुः विद । वेद विद्व विद्म * विद्यात् * वेत्तु, वित्तात् । वित्ताम् । विदन्तु ॥ विद्धि, वित्तात् । वित्तम् । वित्त ॥ वेदानि । वेदाव । वेदाम ॥ अथवा–विदाङ्करोतु इत्यादि * अवेत् । अवित्ताम् । अविदुः । अवेः, अवेत् । अवित्तम् । अवित्त ॥ अवेदम् । अविद्व । अविद्म * विदाञ्चकार इत्यादि अथवा–विवेद विविदतुः इत्यादि * विद्यात् विद्यास्ताम् * वेदिता * वेदिष्यति * अवेदिष्यत् * अवेदीत् ॥

७०–अस=होना, सत्ता

अस्ति स्तः सन्ति । असि स्थः स्थ । अस्मि स्वः स्मः * स्यात् स्याताम् इत्यादि * अस्तु, स्तात् । स्ताम् । सन्तु ॥ एधि, स्तात् । स्तम् । स्त ॥ असानि । असाव । असाम * आसीत् आस्ताम् आसन् । आसीः आस्तम् आस्त । आसम् आस्व आस्म * शेष बभूव इत्यादि "भू" धातु के तुल्य जानो ॥

७१–इ (णृ)=गति, चलना, पहुंचना, पाना

एति इतः यन्ति । एषि इथः इथ । एमि इवः इमः * इयात् इत्यादि * एतु इत्यादि * ऐत् ऐताम् आयन् । ऐः ऐतम् ऐत । आयम् ऐव ऐम * इयाय ईयतुः ईयुः । इययिथ, इयेथ ईयथुः ईय । इयाय, इयय ईयिव ईयिम * ईयात् * एता * एष्यति * ऐष्यत् * अगात् अगाताम् अगुः । अगाः अगातम् अगात । अगाम् अगाव अगाम ॥

वेत्ति सर्वमीश्वरः । विद् ज्ञाने कृष्णः चतुषष्टिकलाः । विदाङ्कुर्वन्तु भवन्तः शास्त्रोक्तं धर्मम् । अस्ति पान्थम् । ग्राममेति पान्थः । पद्भ्यामियात् किमपि दूरं नित्यम् । भुवोन्तमियाय ॥

इति परस्मैपदप्रकरणम् । अथात्मनेपदप्रकरणम्

—:*:—

७२-शीङ्=सोना, शयन करना, नींद लेना

शेते शयाते शेरते । शेषे शयाथे शेध्वे । शये शेवहे शेमहे * शयीत शयीयाताम् शयीरन् । शयीथाः शयीयाथाम् शयीध्वम् । शयीय शयीवहि शयीमहि * शेताम् शयाताम् शेरताम् । शेष्व शयाथाम् शेध्वम् । शयै शयावहै शयामहै * अशेत अशयाताम् अशेरत । अशेथाः अशयाथाम् अशेध्वम् । अशयि अशेवहि अशेमहि * शिश्ये शिश्याते शिश्यिरे । शिश्यिषे शिश्याथे शिश्यिध्वे । शिश्ये शिश्यिवहे शिश्यिमहे * शयिषीष्ट * शयिता * शयिष्यते * अशयिष्यत * अशयिष्ट अशयिषाताम् अशयिषत । अशयिष्ठाः अशयिषाथाम् अशयिध्वम् । अशयिषि अशयिष्वहि अशयिष्महि ॥

७३-इङ्=पढ़ना, अध्ययन

इङ से पूर्व "अधि" उपसर्ग नहीं बिछुड़ता किन्तु सदा साथ ही रहता है। यथा-अधीते अधीयाते अधीयते । अधीषे अधीयाथे अधीध्वे । अधीये अधीवहे अधीमहे * अधीयीत अधीयीयाताम् अधीयीरन् । अधीयीथाः अधीयीयाथाम् अधीयीध्वम् । अधीयीय अधीयीवहि अधीयीमहि * अधीताम् अधीयाताम् अधीयताम् । अधीष्व अधीयाथाम् अधीध्वम् । अध्यै अध्यावहै अध्यामहै * अध्यैत अध्यैयाताम् अध्यैयत । अध्यैथाः अध्यैयाथाम् अध्यैध्वम् । अध्यैयि अध्यैवहि अध्यैमहि * अधिजगे अधिजगाते अधिजगिरे । अधिजगिषे अधिजगाथे अधिजगिध्वे । अधिजगे अधिजगिवहे अधिजगिमहे * अध्येषीष्ट अध्येषीयास्ताम् इत्यादि * अध्येता अध्येतारौ * अध्येष्यते अध्येष्येते * अध्यगीष्यत अध्यगीष्येताम् अध्यगीष्यन्त । अध्यगीष्यथाः अध्यगीष्येथाम् अध्यगीष्यध्वम् । अध्यगीष्ये अध्यगीष्यावहि अध्यगीष्यामहि । अथवा-अध्येष्यत अध्येष्येताम् अध्येष्यन्त । अध्येष्यथाः अध्येष्येथाम् अध्येष्यध्वम् । अध्येष्ये अध्येष्यावहि अध्येष्यामहि * अध्यगीष्ट अध्यगीषाताम् अध्यगीषत । अध्यगीष्ठाः अध्यगीषाथाम् अध्यगीध्वम् । अध्य-

गीवि अध्यगीष्वहि अध्यगीष्महि । अथवा—अध्यैष्ट अध्यैषाताम् अध्यैषत । अध्यैष्ठाः अध्यैषाथाम् अध्यैध्वम् । अध्यैषि अध्यैष्वहि अध्यैष्महि ॥ बालः शेते । छात्रोऽधीते ॥

इत्यात्मनेपदप्रकरणम् ॥ अथोभयपदप्रकरणम् ।

७४—दुह्=दुहना, प्रपूरण, भरना ॥

परस्मै—दोग्धि दुग्धः दुह्रन्ति । धोक्षि दुग्धः दुग्ध । दोह्मि दुह्वः दुह्मः * दुह्यात् दुह्याताम् इत्यादि * दोग्धु, दुग्धात् दुग्धाम् दुह्रन्तु । दुग्धि, दुग्धात् इत्यादि * अधोक्, ग् अदुग्धाम् अदुह्रन् । अधोक्, ग् अदुग्धम् अदुग्ध । अदोहम् अदुह्व अदुह्म * दुदोह दुदुहतुः दुदुहुः । दुदोहिथ, दुदोग्ध दुदुहथुः दुदुह । दुदोह दुदुहिव दुदुहिम * दुह्य त दुह्य स्ताम् इत्यादि * दोग्धा दोग्धारौ * धोक्ष्यति * अधोक्ष्यत् * अधुक्षत् अधुक्षताम् अधुक्षन् । अधुक्षः अधुक्षतम् अधुक्षत । अधुक्षम् अधुक्षाव अधुक्षाम ॥ आत्मने० दुग्धे दुहाते दुहते । धुक्षे दुहाथे धुग्ध्वे । दुहे दुह्वहे दुह्महे * दुहीत दुहीयाताम् दुहीरन् इत्यादि * दुग्धाम् दुहाताम् दुहताम् । धुक्ष्व दुहाथाम् धुग्ध्वम् । दुहै दुहावहै दुहामहै * अदुग्ध अदुहाताम् अदुहत । अदुग्धाः अदुहाताम् अधुग्ध्वम् । अदुहि अदुह्वहि अदुह्महि * दुदुहे दुदुहाते दुदुहिरे इत्यादि * धुक्षीष्ट धुक्षीयास्ताम् इत्यादि * दोग्धा दोग्धारौ दोग्धारः । दोग्धासे इत्यादि * धोक्ष्यते * अधोक्ष्यत * अदुग्ध, अधुक्षत । अधुक्षाताम् । अधुक्षन्त अदुग्धाः, अधुक्षथाः । अधुक्षाथाम् अधुग्ध्वम्, अधुक्षध्वम् ॥ अधुक्षे । अदुह्वहि, अधुक्षावहि । अधुक्षामहि ॥

रक्षकः शेते । विद्यार्थिनोऽधीते । गां पयो दोग्धि गोपालः=ग्वाल गौ से दूध दुहता है । दुह धातु के दो कर्म होते हैं । जैसे १ गौ, २ दूध इत्यादि ॥

७५—दिह्=उपचय, सञ्चय, जुड़ना, लीपना ॥

देग्धि । दिग्धे * दिह्यात् । दिहीत * देग्धु । दिग्धाम् * आगे दुह धातु के तुल्य जानो ॥

७६—लिह्=आस्वादन, चाटना ॥

लेढि लीढः लिहन्ति ॥ लेक्षि लीढः लीढ । लेह्मि लिह्वः लिह्मः ॥ लीढे लिहाते लिहते । लिक्षे लिहाथे लीढ्वे । लिहे लिह्वहे लिह्महे * लिह्यात् । लिहीत * लेढु, लीढात् लीढाम् लिहन्तु । लीढि लीढात् लीढम् लीढ । लेहानि लेहाव लेहाम ॥ लीढाम् लिहाताम् लिहताम् । लिक्ष्व लिहाथाम् लीढ्वम् । लेहै लेहावहै लेहामहै * अलेट् अलीढाम् अलिहन् । अलेट् अलीढम्

अलीढ । अलेहम् अलिह्व अलिह्म ॥ अलीढ अलिहातम् अलिहत । अलीढाः अलिहाथाम् अलीढ्वम् । अलिहि अलिह्वहि अलिह्महि * लिलेह लिलिहतुः लिलिहुः । लिलेहिथ लिलिहथुः लिलिह । लिलेह लिलिहिव लिलिहिम ॥ लिलिहे लिलिहाते लिलिहिरे । लिलिहिषे लिलिहाथे लिलिहिध्वे । लिलिहे लिलिहिवहे लिलिहिमहे * लिह्यात् । लिक्षीष्ट * लेढा लेढारौ लेढारः । लेढासि * लेक्ष्यति । लेक्ष्यते * अलेक्ष्यत् । अलेक्ष्यत * अलिक्षत् । अलीढ, अलिक्षत । अलिक्षाताम् । अलिक्षन्त । अलीढाः, अलिक्षथाः । अलिक्षाथाम् अलीढ्वम्, अलिक्षध्वम् । अलिक्षे । अलिह्वहि, अलिक्षावहि । अलिक्षामहि ॥

युवा शरीरं देग्धि । भ्रमरो रसं लेढि इत्यादि ॥

७७—ब्रूञ्=बोलना, कहना

ब्रवीति, आहं । ब्रूतः, आहथुः । ब्रुवन्ति, आहुः ॥ ब्रवीषि, आत्थ । ब्रूथः आहथुः । ब्रूथ ॥ ब्रवीमि । ब्रूवः । ब्रूमः ॥ ब्रूते ब्रुवाते ब्रुवते । ब्रूषे ब्रुवाथे ब्रूध्वे । ब्रुवे ब्रूवहे ब्रूमहे * ब्रूयात् ब्रूयाताम् । ब्रुवीत ब्रुवीयाताम् * ब्रवीतु, ब्रूतात् । ब्रूताम् । ब्रुवन्तु ॥ ब्रूहि, ब्रूतात् । ब्रूतम् । ब्रूत ॥ ब्रवाणि ब्रवाव । ब्रवाम ॥ ब्रूताम् ब्रुवाताम् ब्रुवताम् । ब्रूष्व ब्रुवाथाम् ब्रूध्वम् ॥ ब्रवै ब्रवावहै ब्रवामहै * अब्रवीत् अब्रूताम् अब्रुवन् । अब्रवीः अब्रूतम् अब्रूत । अब्रवम् अब्रूव अब्रूम ॥ अब्रूत अब्रुवाताम् अब्रुवत । अब्रूथाः अब्रुवाथाम् अब्रूध्वम् ॥ अब्रुवि अब्रूवहि अब्रूमहि * उवाच ऊचतुः ऊचुः । उवचिथ, उवक्थ ऊचथुः ऊच । उवाच, उवच उचिव ऊचिम ॥ ऊचे ऊचाते ऊचिरे इत्यादि * उच्यात् । वक्षीष्ट * वक्ता । वक्ता * वक्ष्यति । वक्ष्यते * अवक्ष्यत् । अवक्ष्यत * अवोचत् अवोचताम् इत्यादि ॥ अवोचत अवोचेताम् इत्यादि ॥

७८—ऊर्णुञ्=आच्छादन, ढकना, ओढ़ना

ऊर्णोति, ऊर्णौति । ऊर्णुतः । ऊर्णुवन्ति ॥ ऊर्णोषि, ऊर्णौषि । ऊर्णुथः । ऊर्णुथ ॥ ऊर्णोमि, ऊर्णौमि । ऊर्णुवः । ऊर्णुमः ॥ ऊर्णुते ऊर्णुवाते ऊर्णुवते । ऊर्णुषे इत्यादि * ऊर्णुयात् । ऊर्णुवीत * ऊर्णोतु, ऊर्णौतु, ऊर्णुतात् । ऊर्णुताम् । ऊर्णुवन्तु ॥ ऊर्णुहि, ऊर्णुतात् । ऊर्णुतम् ऊर्णुत ॥ ऊर्णवानि । ऊर्णवाव । ऊर्णवाम ॥ ऊर्णुताम् ऊर्णुवाताम् ऊर्णुवताम् । ऊर्णुष्व इत्यादि * और्णोत् और्णुताम् और्णुवन् । और्णोः और्णुतम् और्णुत । और्णवम् और्णुव और्णुम । और्णुत और्णुवाताम् और्णुवत । और्णुथाः इत्यादि * ऊर्णुयाव

ऊर्णुनवतुः ऊर्णुनुवः । ऊर्णुनविथ, ऊर्णुनुविथ । ऊर्णुनुवथुः । ऊर्णुनुव ॥ ऊर्णुनाव, ऊर्णुनव । ऊर्णुनुविव, ऊर्णुनविव । ऊर्णुनुविम, ऊर्णुनविम ॥ ऊर्णुनुवे ऊर्णुनुवाते ऊर्णुनुविरे ॥ ऊर्णुनुविषे, ऊर्णुनविषे । ऊर्णुनुवाथे । ऊर्णुनुविध्वे, ऊर्णुनविध्व ॥ ऊर्णुनुवे । ऊर्णुनुविवहे, ऊर्णुनविवहे । ऊर्णुनुविमहे, ऊर्णुनविमहे * ऊर्णूयात् ॥ ऊर्णविषीष्ट, ऊर्णुविषीष्ट * ऊर्णविता २, ऊर्णुविता २ * ऊर्णविष्यति, ऊर्णुविष्यति ॥ ऊर्णविष्यते, ऊर्णुविष्यते * और्णविष्यत्, और्णुविष्यत् । और्णविष्यत, और्णुविष्यत * और्णवीत्, और्णोवीत्, और्णुवीत् ॥ और्णविष्ट अर्णुविष्ट इत्यादि ॥

गुरुहितं वचनं ब्रूते ब्रवीति वा । ऊर्णोति वस्त्रेण देहम् । तवाच वचनं सत्यम् । अवोचद्धृदयङ्गमम् इत्यादि ॥

इत्यदादिगणप्रकरणम् ॥

अथ सिद्धन्ते जुहोत्यादिगणप्रकरणम्

तत्र परस्मैपदिनः

७९–हु=दान और खाना वा हवन करना

जुहोति जुहुतः जुह्वति ॥ जुहोषि जुहुथः जुहुथ । जुहोमि जुहुवः जुहुमः * जुहुयात् * जुहोतु, जुहुतात् । जुहुताम् । जुह्वतु ॥ जुहुधि, जुहुतात् । जुहुतम् । जुहुत ॥ जुहवानि जुहवाव जुहवाम * अजुहोत् अजुहुताम् अजुह्वः । अजुहोः अजुहुतम् अजुहुत ॥ अजुह्वम् अजुह्व अजुहुम * जुहवाञ्चकार जुहवाञ्चक्रतुः इत्यादि ॥ अथवा–जुहाव । जुहुवतुः । जुहुवुः ॥ जुहोथ जुहुवथुः । जुहुव ॥ जुहाव, जुह्व । जुहुव । जुहुम * हूयात् * होता * होष्यति * अहोष्यत् * अहौषीत् अहौष्टाम् अहौषुः । अहौषीः अहौष्टम् अहौष्ट । अहौषम् अहौष्व अहौष्म ॥

८०–(जि) भी=डरना

बिभेति । बिभीतः, बिभितः । बिभ्यति ॥ बिभेषि । बिभीथः, बिभिथः । बिभीथ, बिभिथ ॥ बिभेमि । बिभीवः, बिभिवः । बिभीमः, बिभिमः * बिभीयात् बिभियात् इत्यादि * बिभेतु, बिभीतात्, बिभितात् । बिभीताम्, बिभिताम् । बिभ्यतु ॥ बिभीहि, बिभिहि । बिभीतात्, बिभितात् । बिभीतम्, बिभितम् । बिभीत, बिभित ॥ बिभयानि बिभयाव बिभयाम * अबि-

भेद्ध । अबिभीताम् , अबिभिताम् । अबिभयुः ॥ अबिभेः । अबिभीतम्, अबिभितम् । अबिभीत, अबिभित ॥ अबिभयम् । अबिभीव, अबिभिव । अबिभीम, अबिभिम * बिभयाञ्चकार वा बिभाय बिभ्यतुः बिभ्युः ॥ बिभेथ । बिभ्यथुः । बिभ्य ॥ बिभाय, बिभय । बिभ्यिव । बिभ्यिम । भीयात् भीयास्ताम् इत्यादि * भेता * भेष्यति * अभेष्यत् * अभैषीत् इत्यादि ॥

८१–ह्री=लज्जा करना शर्म करना

जिह्रेति । जिह्रीतः । जिह्रियति ॥ जिह्रेषि इत्यादि * जिह्रीयात्, * जिह्रेतु * अजिह्रेत् * जिह्रयाञ्चकार इत्यादि । वा जिह्राय । जिह्रियतुः इत्यादि * ह्रीयात् * ह्रेता * ह्रेष्यति * अह्रेष्यत् * अह्रैषीत् ॥

८२–पॄ=पालन और पूरण=पूरा करना, भरना

पिपर्त्ति पिपूर्त्तः पिपुरति ॥ पिपर्षि पिपूर्थः पिपूर्थ ॥ पिपर्मि पिपूर्वः पिपूर्मः * पिपूर्यात् * पिपर्तु, पिपूर्त्तात् । पिपूर्त्ताम् । पिपुरतु ॥ पिपूर्धि, पिपूर्त्तात् । पिपूर्त्तम् । पिपूर्त्त ॥ पिपराणि । पिपराव । पिपराम * अपिपः अपिपूर्त्ताम् अपिपरुः । अपिपः अपिपूर्त्तम् अपिपूर्त्त । अपिपरम् अपिपूर्व अपिपूर्म * पपार । पप्रतुः, पपरतुः । पप्रुः, पपरुः । पपारिथ । पप्रथुः, पपरथुः । पप्र, पपर ॥ पपार, पपर । पपृव पपरिव । पपृम, पपरिम * पूर्यात् * परिता, परीता । परितारौ, परीतारौ * परिष्यति, परीष्यति * अपरिष्यत्, अपरीष्यत् * अपारीत् अपारिष्टाम् अपारिषुः ॥ अपारीः अपारिष्टम् अपारिष्ट ॥ अपारिषम् अपारिष्व अपारिष्म ॥

८३–(ओ) हा (क्नू)=त्याग, छोड़ना

जहाति । जहितः, जहीतः । जहति ॥ जहासि । जहिथः, जहीथः इत्यादि जह्यात् । जहातु । जहितात्, जहीतात् । जहिताम्, जहीताम् । जहतु ॥ जहाहि, जहिहि, जहीहि । जहितम्, जहीतम् । जहित, जहीत ॥ जहानि । जहाव । जहाम । अजहात् । अजहिताम्, अजहीताम् । अजहुः ॥ अजहाः । अजहितम्, अजहीतम् । अजहित, अजहीत ॥ अजहाम् । अजहिव, अजहीव । अजहिम, अजहीम । जहौ । जहतुः । जहुः ॥ जहिथ, जहाथ । जहथुः । जह ॥ जहौ जहिव जहिम * हेयात् । हाता । हास्यति । अहास्यत् । अहासीत् अहासिष्टाम् अहासिषुः । अहासीः अहासिष्टम् अहासिष्ट । अहासिषम् अहासिष्व अहासिष्म ॥

भाषा बनाओ

ब्राह्मणाय दक्षिणां जुहोति । निष्टं जुहोति । अग्नौ घृतं जुहोति । दुष्टाद् बिभेति । पापात् जिहीहि, जिहिहि । शूरः प्रतिज्ञां पिपर्त्ति । पात्रं दुग्धेन पिपूर्धि । सुखं जहाति धनाय कृपणः ॥

इति परस्मैपदिनः

अथात्मनेपदिनः—

८४—मा (हू)=मान, मापना वा मानना और बोलना

मिमीते मिमाते मिमते । मिमीषे मिमाथे मिमीध्वे । मिमे मिमीवहे मिमीमहे * मिमीत मिमीयाताम् मिमीरन् । मिमीथाः मिमीयाथाम् मिमीध्वम् । मिमीय मिमीवहि मिमीमहि * मिमीताम् मिमाताम् मिमताम् । मिमीष्व मिमाथाम् मिमीध्वम् । मिमै मिमावहै मिमामहै * अमिमीत अमिमाताम् अमिमत । अमिमीथाः अमिमाथाम् अमिमीध्वम् । अमिमि अमिमीवहि अमिमीमहि * ममे ममाते ममिरे । ममिषे ममाथे ममिध्वे । मामे ममिवहे ममिमहे * मासीष्ट मासीयास्ताम् * माता * मास्यते * अमास्यत * अमास्त अमासाताम् अमासत । अमास्थाः अमासाथाम् अमाध्वम् । अमासि अमास्वहि अमास्महि ॥

८५—(ओ) हा (हू)=गति=ज्ञान, गमन, प्राप्ति

जिहीते जिहाते जिहते । जिहीषे इत्यादि * जिहीत जिहीयाताम् * जिहीताम् * अजहीत * जहे * हासीष्ट * हाता * हास्यते * अहास्यत * अहास्त ॥

इत्यात्मनेपदिनः

अथोभयपदिनः—

८६—(डु) भृ (ञ्)=धारण और पोषण, पालन

परस्मै०—बिभर्त्ति * बिभृयात् * बिभर्तु, बिभृतात् । बिभृताम् । बिभ्रतु * अबिभः अबिभृताम् अबिभरुः । अबिभः अबिभृतम् अबिभृत । अबिभरम् अबिभृव अबिभृम * बिभराञ्चकार वा—अभार * भ्रियात् * भर्त्ता * भरिष्यति * अभरिष्यत् अभार्षीत् अभार्ष्टाम् अभार्षुः । अभार्षीः अभार्ष्टम् अभार्ष्ट । अभार्षम् अभार्ष्व अभार्ष्म * आत्मने०—बिभृते बिभ्राते बिभ्रते । बिभृषे

बिभ्राथे बिभृध्वे । बिभ्रे बिभृवहे बिभृमहे * बिभ्रीत बिभ्रीयाताम् * बिभृताम् बिभ्राताम् बिभ्रताम् । बिभृष्व बिभ्राथाम् इत्यादि * अबिभृत अबिभ्राताम् अबिभ्रत । अबिभृथाः अबिभ्राथाम् अबिभृध्वम् । अबिभ्रि अबिभृवहि अबिभृमहि * बिभराञ्चक्रे बिभराञ्चक्राते वा-अभ्रे अभ्राते * भृषीष्ट * भर्ता * भरिष्यते * अभरिष्यत * अभृत अभृषाताम् ॥

८७–(डु) दा (ञ्)=दान, देना

ददाति दत्तः ददति । ददासि दत्थः दत्थ । ददामि दद्वः दद्मः ॥ दत्ते ददाते ददते । दत्से ददाथे दद्ध्वे । ददे दद्वहे दद्महे * दद्यात दद्याताम् दद्युः । दद्याः दद्यातम् इत्यादि ॥ ददीत ददीयाताम् * ददातु, दत्तात् । दत्ताम् । ददतु ॥ देहि, दत्तात् । दत्तम् । दत्त ॥ ददानि । ददाव । ददाम * दत्ताम् ददाताम् ददताम् । दत्स्व ददाथाम् दद्ध्वम् । ददै ददावहै ददामहै * अददात् अददाताम् अददुः । अददाः अददातम् अददात । अददाम् अददाव अददाम ॥ अदत्त अददाताम् अददत * ददौ ददतुः ददुः । ददिथ, ददाथ ददथुः दद । ददौ ददिव ददिम ॥ ददे ददाते ददिरे । ददिषे * देयात् देयास्ताम् ॥ दासीष्ट * दाता ॥ दाता * दास्यति ॥ दास्यते * अदास्यत् ॥ अदास्यत * अदात् ॥ अदित अदिषाताम् अदिषत । अदिथाः अदिषाथाम् अदिध्वम् । अदिषि अदिष्वहि अदिष्महि ॥

८८–(डु) धा (ञ्)=धारण और पोषण, पालना

दधाति धत्तः दधति । दधासि ॥ धत्ते दधाते दधते * दध्यात् ॥ दधीत * दधातु, धत्तात् । धत्ताम् । दधतु ॥ धत्ताम् दधाताम् दधताम् । धत्स्व * अदधात् ॥ अधत्त * दधौ ॥ दधे * धेयात् ॥ धासीष्ट * धाता ॥ धाता * धास्यति ॥ धास्यते * अधास्यत् ॥ अधास्यत * अधात् ॥ अधित ॥

८९–णिजिर्=शुद्ध करना, शौच और पोषण

नेनेक्ति नेनिक्तः नेनिजति । नेनेक्षि नेनिक्थः नेनिक्थ । नेनेज्मि नेनिज्वः नेनिज्मः ॥ नेनिक्ते नेनिजाते नेनिजते । नेनिक्षे नेनिजाते नेनिग्ध्वे । नेनिजे नेनिज्वहे नेनिज्महे * नेनिज्यात् ॥ नेनिजीत * नेनेक्तु, नेनिक्तात् । नेनिक्ताम् । नेनिजतु ॥ नेनिग्धि, नेनिक्तात् । नेनिक्तम् । नेनिक्त ॥ नेनेजानि । नेनेजाव । नेनेजाम ॥ नेनिक्ताम् नेनिजाताम् नेनिजताम् । नेनिक्ष्व नेनिजाथाम् नेनिग्ध्वम् । नेनेजै नेनेजावहै नेनेजामहै * अनेनेक् अनेनिक्ताम् अनेनिजुः । अनेनेक्

अनेनिक्तम् अनेनिक्त । अनेनेजम् अनेनिज्व अनेनिज्म ॥ अनेनिक्त अनेनिजाताम् अनेनिजत । अनेनिक्थाः अनेनिजाथाम् अनेनिग्ध्वम् । अनेनिजि अनेनिज्वहि अनेनिज्महि * निनेज निनिजतुः निनिजुः ॥ निनेजिथ, निनेक्थ निनिजथुः निनिज ॥ निनेज निनिजिव निनिजिम ॥ निनिजे निनिजाते * निज्यात् ॥ निक्षीष्ट * नेक्षा ॥ नेक्ता * नेक्ष्यति ॥ नेक्ष्यते * अनेक्ष्यत् ॥ अनेक्ष्यत * अनिजत् अनिजताम् अनिजन् इत्यादि ॥ अथवा-अनैक्षीत अनैक्ताम् अनैक्षुः । अनैक्षीः अनैक्तम् अनैक्त । अनैक्षम् अनैक्ष्व अनैक्ष्म ॥ अनिक्त अनिजाताम् अनिजत । अनिक्थाः अनिजाथाम् अनिग्ध्वम् । अनिजि अनिज्वहि अनिज्महि ॥ भाषा बनाओ-

माता पुत्रं निमीते । विद्यार्थी शास्त्रस्यार्थं जिघृक्षते । बिभर्त्ति त्रैलोक्यं विष्णुः । बिभृते कुटुम्बं गृही । ददाति दक्षिणां यजमानः पुरोहिताय । दधाति मालां मालाकारः । धत्ते पुत्रं माता । नेनेक्ति वासांसि रजकः । नेनिक्ते क्षुधार्त्तान् दयालुः ॥

इति जुहोत्यादिगणप्रकरणम् ॥

—:*:—

अथ तिङन्ते दिवादिगणप्रकरणम् ॥

तत्र परस्मैपदिनः ॥

९०-दिवु=क्रीडा, जीतने की इच्छा, जुआ खेलना, व्यवहार, चमकना, स्तुति, हर्ष, मद, स्वप्न, इच्छा और गति ॥

दीव्यति * दीव्येत् * दीव्यतु * अदीव्यत् * दिदेव दिदिवतुः दिदिवुः इत्यादि * दीव्यात् * देविता * देविष्यति * अदेविष्यत् * अदेवीत् अदेविष्टाम् अदेविषुः । अदेवीः अदेविष्टम् अदेविष्ट इत्यादि ॥

९१-षिवु=सीना, सूचीकर्म, तार पूरना

सीव्यति * सीव्येत् * सीव्यतु * असीव्यत् * सिषेव * सीव्यात् * सेविता * सेविष्यति * असेविष्यत् * असेवीत् ॥

९२-नृती=नाचना, नृत्य करना

नृत्यति * नृत्येत् * नृत्यतु * अनृत्यत् * ननर्त्त ननृततुः ननृतुः । ननर्त्तिथ ननृतथुः ननृत । ननर्त्त ननृतिव ननृतिम * नृत्यात् नृत्यास्ताम् * न-

र्त्तिता * नर्त्तिष्यति, नर्तस्यति * अनर्त्तिष्यत्, अनर्तस्यत्, * अनर्तीत् अनर्त्तिष्टाम् अनर्त्तिषुः । अनर्तीः इत्यादि ॥

९३–त्रसी=दुःख पाना, डरना

त्रस्यति, त्रसति । त्रस्येत् , त्रसेत् । त्रस्यतु, त्रसतु । अत्रस्यत्, अत्रसत् । तत्रास । तत्रसतुः, त्रेसतुः । तत्रसुः त्रेसुः ॥ तत्रसिथ, त्रेसिथ । तत्रसथुः, त्रेसथुः । तत्रस, त्रेस । तत्रास, तत्रस । तत्रसिव, त्रेसिव । तत्रसिम, त्रेसिम ॥ त्रस्यात् । त्रसिता । त्रसिष्यति । अत्रसिष्यत् । अत्रासीत्, अत्रसीत् ॥

९४–शो=तनूकरण, बारीक करना, छीलना

श्यति । श्येत् । श्यतु । अश्यत् । शशौ शशतुः शशुः । शशिथ, शशाथ शशथुः शश । शशौ शशिव शशिम ॥ शायात् । शाता । शास्यति । अशास्यत् । अशासीत् अशासिष्टाम् इत्यादि, अथवा-अशात् अशाताम् अशुः । अशाः अशातम् अशात । अशाम् अशाव अशाम ॥

९५–छो=छेदन, बींधना

छ्यति । छ्येत् । छ्यतु । अच्छ्यत् । चच्छौ चच्छतुः । छायात् । छाता । छास्यति । अच्छास्यत् । अच्छात् इत्यादि वा–अच्छासीत् इत्यादि ॥

९६–षो=अन्तकर्म, नाश करना

स्यति । स्येत् । स्यतु । अस्यत । ससौ ससतुः । सायात् । साता । सास्यति । शेष रूप " शो " के तुल्य हैं ॥

९७–दो=तोड़ना, खण्डित करना

द्यति । द्येत् । द्यतु । अद्यत् । ददौ ददतुः । देयात् देयास्ताम् इत्यादि । शेष रूप " शो " के तुल्य हैं ॥

९८–व्यध=ताड़ना, दुःख देना, बाधना

विध्यति । विध्येत् । विध्यतु । अविध्यत् ॥ विव्याध । विविधतुः । विविधुः ॥ विव्यधिथ, विव्यद्ध । विविधथुः । विविध ॥ विव्याध, विव्यध । विविधिव । विविधिम ॥ विध्यात् व्यद्धा व्यद्धारौ । व्यधस्यति । अव्यधस्यत् । अव्यात्सीत् अव्याद्धाम् अव्यात्सुः । अव्यात्सीः अव्याद्धम् अव्याद्ध । अव्यात्सम् अव्यात्स्व अव्यात्स्म ॥

९९–पुष=पुष्टि, पालन, मज़बूत होना

पुष्यति । पुष्येत् । पुष्यतु । अपुष्यत् । पुपोष पुपुषतुः । पुष्यात् ।

पोष्टा * पोक्ष्यति * अपोक्ष्यत् * अपुषत् अपुषताम् अपुषन् । अपुषः अपुषतम् अपुषत । अपुषम् अपुषाव अपुषाम ॥

१००–शुष=शोषण, सूखना, खुश्क होना

शुष्यति * शुष्येत् * शुष्यतु * अशुष्यत् * शुशोष इत्यादि * शुष्यात् * शोष्टा * शोक्ष्यति * अशोक्ष्यत् * अशुषत् ॥

१०१–णश=अदर्शन, नाश

नश्यति * नश्येत् * नश्यतु * अनश्यत् * ननाश नेशतुः नेशुः । नेशिथ, ननष्ठ नेशथुः नेश । ननाश, ननश नेशिव नेशिम * नश्यात् * नंष्टा * नङ्क्ष्यति * अनंक्ष्यत् * अनशत् ॥

भाषानुवाद करो

अक्षैर्दीव्यति दुष्टः । सूच्या सीव्यति वस्त्राणि । नृत्यन्ति निर्लज्जाः गणिकाः । अवृष्ट्या त्रस्यति लोकः । तक्षकः काष्ठं श्यति । लुनति पाशान् दुःखस्य । स्यति सुखानि पापीयान् । द्यन्ति भाण्डानि वानराः । विव्याध शरैरिपून्भटः । पुष्यति बालकः । शुष्यति सरोऽनावृष्ट्या । दिनानि नश्यन्ति वृथा दुरात्मनः ॥

इति परस्मैपदप्रकरणम्

अथात्मनेपदप्रकरणम्–

१०२–षू (ङ्)=प्राणिप्रसव, प्राणी का जनना

लट्–सूयते * लिङ्–सूयेत * लोट्–सूयताम् * लङ्–असूयत * लिट्–सुषुवे सुषुवाते सुषुविरे । सुषुविषे सुषुवाथे सुषुविध्वे । सुषुवे सुषुविवहे सुषुविमहे * आशीर्लिङ्–सोषीष्ट * लुट्–सोता, सविता * लृट्–सोष्यते, सविष्यते * लृङ्–असोष्यत, असविष्यत * लुङ्–असविष्ट, असोष्ट ॥

१०३–दू (ङ्)=परिताप, दुःखी होना

दूयते दूयेते दूयन्ते । दूयसे दूयेथे दूयध्वे । दूये दूयावहे दूयामहे * दूयेत दूयेयाताम् दूयेरन् । दूयेथाः दूयेयाथाम् दूयेध्वम् । दूयेय दूयेवहि दूयेमहि * दूयताम् दूयेताम् दूयन्ताम् । दूयस्व दूयेथाम् दूयध्वम् । दूयै दूयावहै दूयामहै * अदूयत अदूयेताम् अदूयन्त । अदूयथाः अदूयेथाम् अदूयध्वम् । अदूये अदू-

यावहि अदूयामहि * दुदुवे दुदुवाते इत्यादि * दविषीष्ट दविषीयास्ताम् इत्यादि * दविता दवितारौ दवितारः । दवितासे दवितासाथे दविताध्वे । दविताहे दवितास्वहे दवितास्महे * दविष्यते दविष्येते दविष्यन्ते दविष्यसे इत्यादि * अदविष्यत अदविष्येताम् अदविष्यन्त इत्यादि * अदविष्ट अदविषाताम् अदविषत ॥ अदविष्ठाः । अदविषाथाम् । अदविढ्वम् ॥ अदविषि अदविष्वहि । अदविष्महि ॥

१०४–दी (ङ)=क्षय, नाश

दीयते * दीयेत * दीयताम् * अदीयत * दिदीये दिदीयाते दिदीयिरे । दिदीयिषे दिदीयाथे दिदीयिध्वे । दिदीये दिदीयिवहे दिदीयिमहे * दासीष्ट * दाता * दास्यते * अदास्यत * अदास्त अदासाताम् अदासत । अदास्थाः इत्यादि ॥

१०५–डी (डु)=उड़ना, आकाशगति

डीयते * डीयेत * डीयताम् * अडीयत * डिड्ये डिड्याते डिड्यिरे । डिड्यिषे इत्यादि * डयिषीष्ट * डयिता * डयिष्यते * अडयिष्यत * अडयिष्ट ॥ इस के पूर्व सदा उद् उपसर्ग रहता है ॥

१०६–पीङ्=पान, पीना

पीयते * पीयेत * पीयताम् * अपीयत * पिप्ये * पेषीष्ट * पेता * पेष्यते * अपेष्यत * अपेष्ट ॥

भाषा बनाओ

सूयते गौर्वत्सम् । दूयेत चित्तं पापेन । दीयतां पापिनः सम्पत् । उड्डीयन्त पक्षिणः । पिप्ये मधु च राक्षसः । सोषीष्ट पुत्रं तव धर्मपत्नी । दवितास्मि न पुण्यकर्मणा । दास्यन्ते पापिसम्पदः । सस्यानि अखादिष्यन् उदञ्डयिष्यन्त पक्षिणः । अपेषातां बालौ दुग्धं यथारुचि ॥

१०७–माङ्=मान, मानना, मापना, नाप

मायते * मायेत * मायताम् * अमायत * ममे * मासीष्ट * माता * मास्यते * अमास्यत * अमास्त ॥

१०८–जनी=प्रादुर्भाव, पैदा होना, प्रकट होना, उत्पत्ति

जायते * जायेत * जायताम् * अजायत * जज्ञे–जज्ञिवहे जज्ञिमहे * जनिषीष्ट * जनिता * जनिष्यते * अजनिष्यत * अजनि, अजनिष्ट। अजनिषाताम्। अजनिषत इत्यादि ॥

१०९–दीपी=दीप्ति, चमकना, प्रकाश

दीप्यते * दीप्येत * दीप्यताम् * अदीप्यत * दिदीपे * दीपिषीष्ट * दीपिता * दीपिष्यते * अदीपिष्यत * अदीपि, अदीपिष्ट। अदीपिषाताम् ॥

११०–पद=गति=ज्ञान, गमन, प्राप्ति

पद्यते। पद्येत * पद्यताम् * अपद्यत * पेदे पेदाते इत्यादि * पत्सीष्ट * पत्ता * पत्स्यते * अपत्स्यत * अपादि अपत्साताम् अपत्सत इत्यादि ॥

१११–विद=सत्ता, विद्यमानता, होना

विद्यते * विद्येत * विद्यताम् * अविद्यत * विविदे * वित्सीष्ट * वेत्ता * वेत्स्यते * अवेत्स्यत * अवित्त अवित्साताम् अवित्सत। अवित्थाः अवित्साथाम् अविद्ध्वम्। अवित्सि अवित्स्वहि अवित्स्महि ॥

११२–बुध=अवगमन, समझना, जानना

आशीर्लिङ्–भुत्सीष्ट * लुट्–बोद्धा * लृट्–भोत्स्यते * लृङ्–अभोत्स्यत * लुङ्–अबोधि, अबुद्ध। अभुत्साताम् अभुत्सत। अबुद्धाः अभुत्साथाम् अभुद्ध्वम्। अभुत्सि अभुत्स्वहि अभुत्स्महि। शेष रूप "दीपी" धातु के तुल्य जानो ॥

११३–युध=लड़ना, युद्ध करना, संग्राम

युध्यते * युध्येत * युध्यताम् * अयुध्यत * युयुधे * युत्सीष्ट * योद्धा * योत्स्यते * अयोत्स्यत * अयुद्ध ॥

११४–सृज=विसर्ग, त्याग, छोड़ना

सृज्यते * सृज्येत * सृज्यताम् * असृज्यत * ससर्ज ससृजाते ससृजिरे इत्यादि * सृक्षीष्ट * स्रष्टा * स्रक्ष्यते * अस्रक्ष्यत * असृष्ट असृक्षाताम् इत्यादि ॥

भाषानुवाद करो–

पुत्रः पितरं मातरं च मायते (मानता है)। राजानः पृथिवीं मास्यन्ते (मापेंगे)। न कस्यापि गृहे कुपुत्रो जायेत। सूर्यवत् दीप्यतां भवान्। अर्थे-

मपद्यत । ग्रामं पेदे । धनं पत्सीष्ट भवान् विद्यां च । पत्ता भवान् श्वोऽस्य फलं कृतस्य । वेत्स्येऽहमपि जङ्गले । वादं चेदभोत्स्यत वितण्डां नाऽकरिष्यत् । अयुत्सत वीराः सङ्गरे । क्षुद्यते गां दाता ॥

इति आत्मनेपदिनः ॥

अथोभयपदिनः—

११५—मृष=तितिक्षा, सहना

मृष्यति । मृष्यते * मृषेत् । मृषेत * मृष्यतु । मृष्यताम् * अमृष्यत् । अमृष्यत * ममर्ष ममृषतुः ममृषुः । ममर्षिथ ममृषथुः ममृष । ममर्ष ममृषिव ममृषिम ॥ ममृषे ममृषाते इत्यादि * मृष्यात् ॥ मर्षिषीष्ट * मर्षिता मर्षितारौ मर्षितारः । मर्षितासि मर्षितास्थः मर्षितास्थ । मर्षितास्मि मर्षितास्वः मर्षितास्मः ॥ मर्षिता मर्षितारौ मर्षितारः । मर्षितासे मर्षितासाथे मर्षिताध्वे । मर्षिताहे मर्षितास्वहे मर्षितास्महे * मर्षिष्यति । मर्षिष्यते * अमर्षिष्यत् । अमर्षिष्यत * अमर्षीत् । अमर्षिष्ट ॥

११६—नह=बन्धन, बान्धना

नह्यति । नह्यते * नह्येत् । नह्येत * नह्यतु । नह्यताम् * अनह्यत् । अनह्यत * ननाह नेहतुः नेहुः । नेहिथ, ननद्ध नेहथुः नेह । ननाह, ननह नेहिव नेहिम ॥ नेहे नेहाते इत्यादि * नह्यात् । नत्सीष्ट * नद्धा । नद्धा * नत्स्यति । नत्स्यते * अनत्स्यत् । अनत्स्यत * अनात्सीत् अनाद्धाम् अनात्सुः । अनात्सीः अनाद्धम् अनाद्ध । अनात्सम् अनात्स्व अनात्स्म ॥ अनद्ध अनत्साताम् अनत्सत । अनद्धाः अनत्साथाम् अनद्ध्वम् । अनत्सि अनत्स्वहि अनत्स्महि ॥

भाषानुवाद करो—

मृष्यति स्वामी भृत्यानामपराधान् । नह्यते रज्जुः काष्ठानि । मृष्येत् स्तुतिनिन्दे उभे अपि साधुः । पुस्तकं सम्यक् नह्येत् छात्रः । ममृषिरे सीता रामलक्ष्मणा बहुदुःखजातानि वने ॥

इति दिवादयः

—*—

अथ स्वादिगणप्रकरणम्

तत्रोभयपदिनः—

११७—षु (ञ्)=अभिषव, अर्क खींचना

सुनोति सुनुतः सुन्वन्ति। सुनोषि सुनुथः सुनुथ। सुनोमि सुन्वः, सुन्मः, सुनुमः॥ सुनुते सुन्वाते सुन्वते। सुनुषे सुन्वाथे सुनुध्वे। सुन्वे सुनुवहे, सुन्वहे सुनुमहे, सुन्महे॥ सुनुयात् इत्यादि॥ सुन्वीत सुन्वीयाताम् सुन्वीरन्। सुन्वीथाः सुन्वीयाथाम् सुन्वीध्वम्। सुन्वीय सुन्वीवहि सुन्वीमहि॥ सुनोतु, सुनुतात् सुनुताम् सुन्वन्तु। सुनु, सुनुतात् सुनुतम् सुनुत। सुनवानि सुनवाव सुनवाम॥ सुनुताम् सुन्वाताम् सुन्वताम्। सुनुष्व सुन्वाथाम् सुनुध्वम्। सुनवै सुनवावहै सुनवामहै॥ असुनोत् असुनुताम् असुन्वन्। असुनोः असुनुतम् असुनुत। असुनवम् असुन्व, असुनुव असुन्म, असुनुम॥ असुनुत असुन्वाताम् असुन्वत। असुनुथाः असुन्वाथाम् असुनुध्वम्। असुन्वि असुन्वहि, असुनुवहि असुन्महि, असुनुमहि॥ सुषाव सुषुवतुः सुषुवुः। सुषविथ, सुषोथ सुषुवथुः सुषुव। सुषाव, सुषव सुषुविव सुषुविम॥ सुषुवे सुषुवाते सुषुविरे। सुषुविषे सुषुवाथे सुषुविध्वे। सुषुवे सुषुविवहे सुषुविमहे॥ सूयात्। सोषीष्ट॥ सोता। सोता॥ सोष्यति। सोष्यते॥ असोष्यत्। असोष्यत॥ असावीत् असाविष्टाम् असाविषुः। असावीः असाविष्टम् असाविष्ट। असाविषम् असाविष्व असाविष्म॥ असोष्ट असोषाताम् असोषत। असोष्ठाः असोषाथाम् असोढ्वम्। असोषि असोष्वहि असोष्महि॥

११८—चि (ञ्)=चयन, चुनना

चिनोति चिनुतः इत्यादि। चिनुते चिन्वाते इत्यादि॥ चिनुयात्। चिन्वीत॥ चिनोतु। चिनुताम्॥ अचिनोत्। अचिनुत॥ चिचाय चिक्यतुः चिक्युः। चिचयिथ, चिचेथ चिक्ययुः चिक्य। चिचाय, चिचय चिक्यिव चिक्यिम॥ अथवा—चिकाय चिक्यतुः इत्यादि। चिक्ये चिक्याते वा—चिक्ये चिक्याते इत्यादि॥ चीयात्। चेषीष्ट॥ चेता। चेता॥ चेष्यति। चेष्यते॥ अचेष्यत्। अचेष्यत॥ अचैषीत् अचैष्टाम् अचैषुः। अचैषीः अचैष्टम् अचैष्ट। अचैषम् अचैष्व अचैष्म। अचेष्ट अचेषाताम् अचेषत। अचेष्ठाः अचेषाथाम् अचेढ्वम्। अचेषि अचेष्वहि अचेष्महि॥

११९–स्तृ (ञ्)=आच्छादन, ढकना

स्तृणोति । स्तृणुते ॥ स्तृणुयात् । स्तृण्वीत ॥ स्तृणोतु । स्तृणुताम् ॥ अस्तृणोत् । अस्तृणुत ॥ तस्तार तस्तरतुः तस्तरुः । तस्तरिथ, तस्तर्थ तस्तरथुः तस्तर । तस्तार, तस्तर तस्तरिव तस्तरिम ॥ तस्तरे तस्तराते तस्तरिरे । तस्तरिषे इत्यादि ॥ स्तर्यात् इत्यादि । स्तृषीष्ट इत्यादि वा–स्तरिषीष्ट इत्यादि ॥ स्तर्ता । स्तर्तारौ ॥ स्तरिष्यति । स्तरिष्यते ॥ अस्तरिष्यत् । अस्तरिष्यत ॥ अस्तार्षीत् अस्तार्ष्टाम् अस्तार्षुः । अस्तार्षीः अस्तार्ष्टम् अस्तार्ष्ट । अस्तार्षम् अस्तार्ष्व अस्तार्ष्म ॥ अस्तरिष्ट अस्तरिषाताम् अस्तरिषत । अस्तरिष्ठाः अस्तरिषाथाम् अस्तरिढ्वम् । अस्तरिषि अस्तरिष्वहि अस्तरिष्महि ॥ अथवा–अस्तृत अस्तृषाताम् अस्तृषत । अस्तृथाः अस्तृषाथाम् अस्तृढ्वम् । अस्तृषि अस्तृष्वहि अस्तृष्महि ॥

१२०–धू (ञ्)=कम्पन, कांपना वा कम्पाना

धूनोति । धूनुते ॥ धूनुयात् । धून्वीत ॥ धूनोतु । धूनुताम् ॥ अधूनोत् । अधूनुत ॥ दुधाव दुधुवतुः दुधुवुः । दुधविथ, दुधोथ दुधुवथुः दुधुव दुधाव, दुधव दुधुविव दुधुविम । दुधुवे दुधुवाते इत्यादि ॥ धूयात् । धोषीष्ट इत्यादि वा धविषीष्ट इत्यादि ॥ धोता वा–धविता ॥ धोष्यति, धविष्यति । धोष्यते, धविष्यते ॥ अधोष्यत्, अधविष्यत् । अधोष्यत, अधविष्यत ॥ अधौषीत् वा–अधावीत् अधाविष्टाम् अधाविषुः इत्यादि ॥ अधविष्ट, अधोष्ट इत्यादि दो दो रूप जानो ॥

भाषा बनाओ–

अध्वर्युः सोमं सुनोति यज्ञाय । किमर्थं दशमूलानि सुनुषे ? । ज्वरितः पर्पटं सुनुयात् पिबेच्च (पर्पट=पित्तपापड़ा नामक ओषधि का नाम है) । चिनुयादिष्टका वेद्याम् । स्तृणुयात्कुशैर्मेखलम् । धूनोति चम्पकवनानि वायुः । सुषुवे वैद्य ओषधीः । चिकाय भित्तिमिष्टकाभिः चमूपः । अचैषम यज्ञे समिधः समन्तात् । स्तृषीष्ट यशसा दिवम् । इत्यादि ॥

संस्कृत बनाओ–

मैंने तुम्हारे लिये पञ्चमूल का अर्क खींचा है । तुम अपने लिये मकान बनाओ । वृक्ष को हिलाओ फल गिरेंगे । कर्मकार भींत को चिनते हैं । हम सोम का अर्क खींचेंगे, उस से दीर्घजीवी होवेंगे । रक्षक चोर को बांधता है ।

महात्मा लोग सुख और दुःख दोनों को सहते हैं । वे दुःख में अधीर नहीं होते और सुख में प्रमाद नहीं करते। शिष्य गुरु को मानते हैं। दरज़ी कपड़ा सींता है । पाप अवश्य प्रकट होते हैं, तथा पुण्य भी । विद्यार्थियो ! आपस में मत लड़ो । आलस्य छोड़ो । द्वन्द्व सहो । अर्थ समझो । शिखा बन्धों । गुडूची का अर्क खींचो । पुष्प चुनो और ऐसे ही सद्गुण चुनो । अवगुण त्यागो । देह को ढको । पांव मत हिलाओ । इत्यादि ॥

इति तिङन्ते स्वादिगणप्रकरणम्

अथ तिङन्ते तुदादयः ॥ तत्रोभयपदिनः-

१२१-तुद=व्यथन, चुभाना

तुदति । तुदते ॥ तुदेत् । तुदेत ॥ तुदतु । तुदताम् ॥ अतुदत् । अतुदत ॥ तुतोद तुतुदतुः इत्यादि ॥ तुतुदे तुतुदाते इत्यादि ॥ तुद्यात् । तुत्सीष्ट ॥ तोत्ता । तोत्ता ॥ तोत्स्यति । तोत्स्यते ॥ अतोत्स्यत् । अतोत्स्यत ॥ अतौत्सीत् अतौत्ताम् अतौत्सुः । अतौत्सीः इत्यादि ॥ अतुत्त अतुत्साताम् अतुत्सत । अतुत्थाः अतुत्साथाम् अतुद्ध्वम् । अतुत्सि अतुत्स्वहि अतुत्स्महि ॥

१२२-णुद=प्रेरणा करना, उकसाना

नुदति इत्यादि "तुद," के तुल्य जानो ॥

१२३-भ्रस्ज=पकाना, पाक, भूनना

भृज्जति । भृज्जते ॥ भृज्जेत् । भृज्जेत ॥ भृज्जतु । भृज्जताम् । अभृज्जत् । अभृज्जत ॥ बभर्ज बभर्जतुः बभर्जुः । बभर्जिथ, बभर्ष्ठ बभर्जथुः बभर्ज । बभर्ज बभर्जिव बभर्जिम ॥ अथवा-बभ्रज्ज बभ्रज्जतुः बभ्रज्जुः । बभ्रज्जिथ, बभ्रष्ठ बभ्रज्जथुः बभ्रज्ज । बभ्रज्ज बभ्रज्जिव बभ्रज्जिम ॥ बभर्जे बभर्जाते इत्यादि । अथवा-बभ्रज्जे बभ्रज्जाते इत्यादि ॥ भृज्ज्यात् भृज्ज्यास्ताम् इत्यादि ॥ भर्क्षीष्ट वा-भर्क्षीष्ट इत्यादि ॥ भर्ष्टा वा-भ्रष्टा ॥ भ्रक्ष्यति, भर्क्ष्यति । भ्रक्ष्यते, भर्क्ष्यते ॥ अभ्रक्षयत्, अभर्क्षयत् ॥ अभ्रक्षयत, अभर्क्षयत ॥ अभ्राक्षीत्, अभार्क्षीत् । अभ्रष्ट अभ्रक्षाताम् इत्यादि वा-अभर्ष्ट अभर्क्षाताम् अभर्क्षत । अभर्ष्टाः अभर्क्षाथाम् अभर्द्ध्वम् । अभर्क्षि अभर्क्ष्वहि अभर्क्ष्महि ॥

१२४–कृष=विलेखन, खोदना, हलकर्म, जोतना

कृषति । कृषते ॥ कृषेत् । कृषेत ॥ कृषतु । कृषताम् ॥ अकृषत् । अकृषत ॥ चकर्ष चकृषतुः चकृषुः । चकर्षिथ, चकर्ष्ठ चकृषथुः चकृष । चकर्ष चकृषिव चकृषिम ॥ चकृषे चकृषाते चकृषिरे इत्यादि ॥ कृष्यात् । कृक्षीष्ट ॥ कर्ष्टा वा–कर्ष्टा ॥ कर्क्ष्यति वा–कर्क्षयति । कर्क्ष्यते, कर्क्षयते ॥ अकर्क्ष्यत्, अकर्क्षयत् । अकर्क्ष्यत, अकर्क्षयत ॥ अकार्क्षीत् अकार्ष्टाम् अकार्क्षुः । अकार्क्षीः अकार्ष्टम् अकार्ष्ट । अकार्क्षम् अकार्क्ष्व अकार्क्ष्म ॥ अथवा–अकार्षीत् अकार्ष्टाम् इत्यादि ॥ अकृक्षत अकृक्षाताम् अकृक्षत । अकृक्षाः अकृक्षाथाम् अकृढ्वम् । अकृक्षि अकृक्ष्वहि अकृक्ष्महि । अथवा–अकृक्षत अकृक्षाताम् अकृक्षन्त । अकृक्षथाः इत्यादि ॥

१२५–मिल=सङ्गम, मिलना

मिलति । मिलते ॥ मिलेत् । मिलेत ॥ मिलतु । मिलताम् ॥ अमिलत् । अमिलत ॥ मिमेल मिमिलतुः । इत्यादि ॥ मिमिले मिमिलाते इत्यादि ॥ मिल्यात् । मेलिषीष्ट ॥ मेलिता । मेलिता ॥ मेलिष्यति । मेलिष्यते ॥ अमेलिष्यत् । अमेलिष्यत ॥ अमेलीत् अमेलिष्टाम् अमेलिषुः । अमेलीः इत्यादि ॥ अमेलिष्ट अमेलिषाताम् अमेलिषत । अमेलिष्ठाः इत्यादि ॥

भाषा बनाओ–

हस्तिपोऽङ्कुशेन हस्तिमस्तकं तुदति । तुदन्ति बाणा मर्मस्थाः । तुतुदे रावणवाहिनीं स रामः । न तुदेत परस्य मर्मगूढम् । तुत्सीष्ट शत्रुहृदयानि नृपः । अश्वं नुदति । चणकं भृज्जति । क्षेत्रं कृषति । मित्रेण मिलति । रामरावणयोर्युद्धे रामोऽतौत्सीद्रिपोश्चमूम् । बभ्रज्जे तपसा पापम् । स चकर्ष महीमेताम् । श्वो मेलितास्मि । प्रातर्मेलितास्महे । क्षेत्रं तावत् सम्यक् कृषेत तदनु बीजं वपेत् ॥

संस्कृत बनाओ–

किसी का हृदय मत दुखाओ । संसार को धर्म में प्रेरणा करो । खेत को अच्छे प्रकार खोदो (जोतो) । सब से प्रीति से मिलो । दुष्ट ! तेरा हृदय बाण से बींध दूंगा । यदि गुरु भी पाप में प्रेरणा करे तो मत मानो ॥

१२६–मुच् (रु) मोचन, छोड़ना

मुञ्चति । मुञ्चते ॥ मुञ्चेत् । मुञ्चेत ॥ मुञ्चतु । मुञ्चताम् ॥ अमुञ्चत् । अमुञ्चत ॥ मुमोच मुमुचतुः । मुमुचे ॥ मुच्यात् । मुचीष्ट ॥ मोक्ता । मोक्ता ॥

मोक्षयति । मोक्षयते ॥ अमोक्षयत् । अमोक्षयत ॥ अमुचत् अमुचताम् अमुचन् । अमुचः इत्यादि ॥ अमुक्त अमुक्षाताम् अमुक्षत । अमुक्थाः अमुक्षाथाम् अमुग्ध्वम् । अमुक्षि अमुक्ष्वहि अमुक्ष्महि ॥

१२७–लुप् (लृ)=छेदन, काटना

लुम्पति । लुम्पते ॥ लुम्पेत । लुम्पेत ॥ लुम्पतु । लुम्पताम् ॥ अलुम्पत् । अलुम्पत ॥ लुलोप । लुलुपे ॥ लुप्यात् । लुप्सीष्ट ॥ लोप्ता । लोप्ता ॥ लोप्स्यति । लोप्स्यते ॥ अलोप्स्यत् । अलोप्स्यत ॥ अलुपत् ॥ अलुप्त अलुप्साताम् अलुप्सत । अलुप्थाः अलुप्साथाम् अलुब्ध्वम् इत्यादि ॥

१२८–विदु (लृ)=लाभ, लेना, पाना

विन्दति । विन्दते ॥ लिट्–विवेद । विविदे ॥ विद्यात् । वित्सीष्ट ॥ वेत्ता । वेत्ता ॥ वेत्स्यति । वेत्स्यते ॥ लुङ्–अविदत् । अवित्त अवित्साताम् इत्यादि ॥ किन्हीं के मत में–वेदिषीष्ट ॥ वेदिता ॥ वेदिष्यति ॥ अवेदिष्यत् ॥ अवेदीत् । अवेदिष्ट इत्यादि प्रकार से भी प्रयोग होता है ॥

१२९–सिच=क्षरण, बखेरना, टपकाना, चुवाना वा सींचना

सिञ्चति इत्यादि ॥ सिषेच ॥ सिच्यात् । सिक्षीष्ट ॥ सेक्ता ॥ सेक्ष्यति इत्यादि ॥ असिचत् । असिक्त असिक्षाताम् इत्यादि ॥

१३०–लिप=उपदेह, लीपना, पोतना, देह बढ़ाना

लिम्पति इत्यादि (१२७) " लुप् " के तुल्य जानो ॥

भाषा बनाओ–

हठं मुञ्च । क्षेत्रं लुम्प । विद्यां विन्द । वृक्षवाटिकां सिञ्चध्वम् । वेदिं लिम्पताम् । मोक्ष्यामि गृहबन्धनात् । मोक्ष्ये निगडबन्धनात् (निगड=जेल) । लुलुपे पुस्तकानि मूषकः । कृतस्य विन्दते फलम् । वारिदोऽयं सेक्ष्यति सकलं भारतं वर्षम्, तदा सुभिक्षं वेत्स्यामहे । तैलेन लिम्पति देहं मल्लः ॥

संस्कृत बनाओ–

हठ छोड़ो । मूर्खता के जाल को छेदो (काटो) । पूर्व कर्मों का फल पाओ । आंगन लीपो (आंगन=अङ्गण=स्थानादि का सहन) खेत सींचो । घृत टपकाओ मत । दूध मत बखेरो । यह अमृत है ॥

इत्युभयपदप्रकरणम् ॥

अथ परस्मैपदिनः-

१३१-कृती=छेदन, कृन्तन, काटना

कृन्तति ॥ कृन्तेत् ॥ कृन्ततु ॥ अकृन्तत् ॥ चकर्त्त चकृततुः चकृतुः । चकर्त्तिथ चकृतथुः चकृत । चकर्त्त चकृतिव चकृतिम ॥ कृत्यात् ॥ कर्त्तिता ॥ कर्त्तिष्यति ॥ अकर्त्तिष्यत् ॥ अकर्त्तीत् अकर्त्तिष्टाम् अकर्त्तिषुः । अकर्त्तीः इत्यादि ॥

१३२-खिद=दुःख पाना, खेद, कष्ट

खिन्दति इत्यादि ॥ चिखेद चिखिदतुः इत्यादि ॥ खिद्यात् ॥ खेत्ता ॥ खेत्स्यति ॥ अखेत्स्यत् ॥ अखैत्सीत् अखैत्ताम् अखैत्सुः । अखैत्सीः अखैत्तम् अखैत्त । अखैत्सम् अखैत्स्व अखैत्स्म ॥

१३३-पिश=अवयव, टुकड़े करना, पीसना

पिंशति ॥ पिंशेत् ॥ पिंशतु ॥ अपिंशत् ॥ पिपेश ॥ पिश्यात् ॥ पेशिता ॥ पेशिष्यति ॥ अपेशिष्यत् ॥ अपेशीत् ॥

१३४-(ओ) व्रश्चू=छेदन, काटना

वृश्चति ॥ वृश्चेत् ॥ वृश्चतु ॥ अवृश्चत् ॥ वव्रश्च वव्रश्चतुः वव्रश्चुः । वव्रश्चिथ, वव्रष्ठ वव्रश्चथुः वव्रश्च । वव्रश्च वव्रश्चिव वव्रश्चिम ॥ व्रश्च्यात् ॥ व्रश्चिता, व्रष्टा ॥ व्रश्चिष्यति, व्रक्ष्यति ॥ अव्रश्चिष्यत्, अव्रक्ष्यत् ॥ अव्रश्चीत् ॥

१३५-व्यच=व्याजीकरण, बहानेबाज़ी, ठगई

विचति ॥ विचेत् ॥ विचतु ॥ अविचत् ॥ विव्याच विविचतुः विविचुः । विव्यचिथ विविचथुः विविच । विव्याच, विव्यच विविचिव विविचिम ॥ विच्यात् ॥ व्यचिता ॥ व्यचिष्यति ॥ अव्यचिष्यत् ॥ अठयाचीत्, अव्यचीत् ॥

भाषानुवाद करो-

चणकं पिंशति वृद्धा । पापेन खिन्दति लोकः । वृश्चिको मनुष्यं पादे वृश्चति (वृश्चिक=बिच्छू) । विचति खलः पथिकान् । कृन्तति मूलं वृक्षस्य तक्षकः (बढ़ई) इत्यादि ॥

संस्कृतानुवाद करो-

बुढ़िया गोधूम पीसती थी । पापी दुःख पाते हैं । बिच्छू अङ्गुली में काटता है । धूर्त्त बहकाता था । दुष्ट का शिर काटो । मित्र से स्नेह करो । इत्यादि ॥

१३६–उञ्छि=उञ्छ, शिला चुगना

उञ्छति ॥ उञ्छेत् ॥ उञ्छतु ॥ औञ्छत् ॥ उञ्छाञ्चकार उञ्छाञ्चक्रतुः इत्यादि वा उञ्छामास उञ्छामासतुः वा-उञ्छाम्बभूव उञ्छाम्बभूवतुः इत्यादि॥ उञ्छ्यात् ॥ उञ्छिता ॥ उञ्छिष्यति ॥ औञ्छिष्यत् ॥ औञ्छीत् ॥

१३७=ऋच्छ=गति, मूर्च्छा, मूर्त्तिभाव, अचेतनता

ऋच्छति ॥ ऋच्छेत् ॥ ऋच्छतु ॥ आर्च्छत् ॥ आनर्छ आनर्छतुः आनर्छुः आनर्छिथ आनर्छथुः आनर्छ । आनर्छ आनर्छिव आनर्छिम ॥ ऋच्छ्यात् ॥ ऋच्छिता ॥ ऋच्छिष्यति ॥ आर्च्छिष्यत् ॥ आर्च्छीत् ॥

१३८–उज्झ=त्याग, छोड़ना, उत्सर्ग

उज्झति ॥ उज्झेत् ॥ उज्झतु ॥ औज्झत् ॥ उज्झाञ्चकार, उज्झामास, उज्झाम्बभूव ॥ उज्झ्यात् ॥ उज्झिता ॥ उज्झिष्यति ॥ औज्झिष्यत् ॥ औज्झीत् ॥

१३९–लुभ=लुभाना, मोहित होना

लुभति ॥ लुभेत् ॥ लुभतु ॥ अलुभत् ॥ लुलोभ लुलुभतुः लुलुभुः । लुलोभिथ लुलुभथुः लुलुभ । लुलोभ, लुलुभ लुलुभिव लुलुभिम ॥ लुभ्यात् ॥ लोभिता, लोब्धा ॥ लोभिष्यति, लोप्स्यति ॥ अलोभिष्यत्, अलोप्स्यत ॥ अलोभीत् ॥

१४० । १४१ तृप, तृम्फ=तृप्ति, तृप्त होना

तृपति ॥ तृपेत् ॥ तृपतु ॥ अतृपत् ॥ ततर्प ततृपतुः ॥ तृप्यात् ॥ तर्पिता ॥ तर्पिष्यति ॥ अतर्पिष्यत् ॥ अतर्पीत् ॥ तृम्फति इत्यादि ॥ ततृम्फ ततृम्फतुः शेष " तृप " के तुल्य हैं ॥

१४२ । १४३–मृड, मृड=सुखी होना, सुखपाना

मृडति ॥ मृडेत् ॥ मृडतु ॥ अमृडत् ॥ ममर्ड ममृडतुः ॥ मृड्यात् ॥ मर्डिता ॥ मर्डिष्यति ॥ अमर्डिष्यत् ॥ अमर्डीत् ॥ इसी प्रकार " मृड " ॥

१४४–शुन=गति–ज्ञान, गमन, प्राप्ति

शुनति ॥ शुनेत् ॥ शुनतु ॥ अशुनत् ॥ शुशोन शुशुनतुः ॥ शुन्यात् ॥ शोनिता ॥ शोनिष्यति ॥ अशोनिष्यत् ॥ अशोनीत् ॥

१४५–इषु=इच्छा, चाहना

इच्छति ॥ इच्छेत् ॥ इच्छतु ॥ ऐच्छत् ॥ इयेष । ईषतुः ॥ इष्यात् ॥ एषिता, एष्टा ॥ एषिष्यति ॥ ऐषिष्यत् ॥ ऐषीत् ॥

भाषानुवाद करो

ऋषय उच्छन्ति स्म । ग्राममृच्छति पान्थः । ऋच्छति रोगी । आनर्च्छ शस्त्रपातेन । उज्झति जलम् । लुभति परधनं दृष्ट्वा पापीयान् । तृपन्ति ब्राह्मणाः यजमानगृहे । तृम्फन्ति भिक्षुका उदरपूर्तिमात्रेण । मृष्टति सम्पत्त्या लोकः । पृष्टति ज्ञानेन तत्त्ववित् । ग्रामं शृणति । अर्थं शृणेत् । वेदान् शृणतु ब्राह्मणः । धनमिच्छन्ति लोलुपाः । इत्यादि ॥

संस्कृतानुवाद करो

कणाद ऋषि शिक्षा चुगता था । उस से ही तृप्त होता था और वैशेषिक दर्शन को बनाता था (समऽपादीत्) । राहगीर (पथिक) चीन को जाता है । बाण से मूर्छित होता है । लोभ को त्यागो । विद्या और धर्म को लुभाओ । अपने ही पदार्थों मे तृप्त होओ । जो पराक्ष और परधन से तृप्त होते हैं वे पुरुषार्थहीन होते हैं, दुःख पाते हैं, सुखी कभी नहीं होते । वेदार्थ को जानो, इस लोक और परलोक में सुखी होओगे । यश और धर्म को चाहो । इत्यादि ॥

अथ तुदादिगन्तर्गताः कुटादयः

१४६–कुट=कुटिलपना, कौटिल्य, खोटाई

कुटति ॥ कुटेत् ॥ कुटतु ॥ अकुटत् ॥ चुकोट चुकुटतुः चुकुटुः । चुकुटिथ चुकुटथुः चुकुट । चुकोट, चुकुट चुकुटिव चुकुटिम ॥ कुटयात् ॥ कुटिता ॥ कुटिष्यति ॥ अकुटिष्यत् ॥ अकुटीत् ॥

१४७–पुट–=संश्लेषण, चिपटना, चिपटाना

१४८–स्फुर=विकसन, फटना, खिलना

१४९–स्फुर=संचलन, फुरकना, चलना

१५०–स्फुल ,, ,, ,,

इन सब के रूप " कुट " के तुल्य जानो । परन्तु निर्, नि और वि से आगे इन धातुओं का सकार मूर्धन्य (ष) भी हो जाता है । जैसे–निष्फुलति निस्फुलति । निष्फुरति, निस्फुरति इत्यादि ॥

१५१–णू=स्तुति, प्रशंसा करना

नुवति ॥ नुवेत् ॥ नुवतु ॥ अनुवत् ॥ नुनाव नुनुवतुः नुनुवुः । नुनविथ नुनुवथुः नुनुव । नुनाव, नुनव नुनुविव नुनुविम ॥ नूयात् ॥ नुविता ॥ नुविष्यति ॥ अनुविष्यत् ॥ अनुवीत् ॥

इति कुटादयः

१५२–(टु) मस्जो=शुद्ध करना वा मांजना

मज्जति ॥ मज्जेत् ॥ मज्जतु ॥ अमज्जत् ॥ ममज्ज ममज्जतुः ममज्जुः । ममज्जिथ ममज्जथुः ममज्ज । ममज्ज ममज्जिव ममज्जिम ॥ मज्ज्यात् ॥ मङ्क्ता ॥ मङ्क्ष्यति ॥ अमङ्क्ष्यत् ॥ अमाङ्क्षीत् अमाङ्क्ताम् अमाङ्क्षुः । अमाङ्क्षीः अमाङ्क्तम् अमाङ्क्त । अमाङ्क्षम् अमाङ्क्ष्व अमाङ्क्ष्म ॥

१५३–रुजो=भङ्ग होना, टूटना, ख़राबी

रुजति इत्यादि ॥ रुरोज रुरुजतुः ॥ रुज्यात् ॥ रोक्ता ॥ रोक्ष्यति ॥ अरोक्ष्यत् ॥ अरौक्षीत् अरौक्ताम् अरौक्षुः । अरौक्षीः अरौक्तम् अरौक्त ॥ अरौक्षम् अरौक्ष्व अरौक्ष्म ॥

१५४–भुजो=कौटिल्य, खोटापन, कुटिलता

भुजति इत्यादि " रुज " के तुल्य रूप जानो ॥

भाषानुवाद करो–

कुटन्ति वेश्याः । पुटति घृतं शिरसा तैलं वा । स्फुटन्ति पुष्पाणि वसन्ते । स्फुरति रुधिरं नाडीषु । स्फुलन्ति मण्डूकाः सरस्सु । नुवत परमात्मानं सर्वदा स एकोगुरुः सर्वस्य । उपास्यश्च स एव । निमज्जत प्रातः प्रातर्नित्यं जलाशयेषु । देहो रुजति पीडया । भुजति सर्पः इत्यादि ॥

संस्कृतानुवाद करो–

मूर्ख कुटिलता करते हैं । कज्जल वस्त्र पर लिपट जाता है । आम बौरते हैं । अङ्ग फुरकते हैं । आंख फुरकती है । धर्मात्मा लोग परमात्मा की स्तुति करते हैं । प्रातःकाल नित्य जलाशय में देह शुद्ध करे । शिर दुखता है । सर्प गण्डलाते हैं । इत्यादि ॥

१५५—विश=प्रवेश, घुसना

विशति ॥ विशेत् ॥ विशतु ॥ अविशत् ॥ विवेश विविशतुः विविशुः । विवेशिथ विविशथुः विविश । विवेश विविशिव विविशिम ॥ विश्यात् ॥ वेष्टा ॥ वेक्षयति ॥ अवेक्षयत् ॥ अवैक्षीत् ॥

१५६—मृश=आमर्शन, छूना, स्पर्श करना

मृशति इत्यादि ॥ ममर्श ममृशतुः ॥ मृश्यात् ॥ मर्ष्टा, मर्शा ॥ मर्क्ष्यति, मर्क्षयति ॥ अमर्क्ष्यत्, अमर्क्षयत् ॥ अमार्क्षीत्, । अमार्क्षीत् । अमार्ष्टाम्, अमार्ष्टाम् । अमार्क्षुः, अमार्क्षुः इत्यादि ॥ अथवा-अमृशत् अमृशताम् अमृशन् । अमृशः इत्यादि ॥

१५७—षद् (लृ) विशरण=बिखरना । गति=ज्ञान, गमन, प्राप्ति । दुःखी होना ॥

सीदति ॥ सीदेत् ॥ सीदतु ॥ असीदत् ॥ ससाद सेदतुः सेदुः । सेदिथ सेदथुः सेद । ससाद, ससद सेदिव सेदिम ॥ सद्यात् ॥ सत्ता ॥ सत्स्यति ॥ असत्स्यत् ॥ असदत् असदताम् ॥

१५८—शद् (लृ)=शातन, बिखरना, विशीर्ण होना

यह धातु लट्, लिङ्, लोट् और लङ् में आत्मनेपदी है, आगे परस्मैपदी ॥ शीयते शीयेते शीयन्ते । शीयसे ॥ शीयेत शीयेयाताम् ॥ शीयताम् शीयेताम् ॥ शीयन्ताम् ॥ अशीयत अशीयेताम् अशीयन्त । अशीयथाः ॥ शशाद शेदतुः ॥ शद्यात् ॥ शत्ता ॥ शत्स्यति ॥ अशत्स्यत् ॥ अशदत् ॥

१५९—कॄ=विक्षेप, बखेरना

किरति ॥ किरेत् ॥ किरतु ॥ अकिरत् ॥ चकार ॥ चकरतुः चकरुः । चकरिथ चकरथुः चकर । चकार, चकर चकरिव चकरिम । कीर्यात् ॥ करिता, करीता ॥ करिष्यति, करीष्यति ॥ अकरिष्यत्, अकरीष्यत् ॥ अकारीत् अकारिष्टाम् ॥

" उप " उपसर्ग से परे कॄ धातु हो तो छेदन अर्थ में-उपस्किरति ॥ उपस्किरेत् ॥ उपस्किरतु ॥ उपास्किरत् ॥ तथा-उपचस्कार इत्यादि सकार-युक्त प्रयोग होते हैं ॥

"उप" और " प्रति " उपसर्ग से परे भी कॄ धातु के रूप हिंसा अर्थ में-प्रतिस्किरति ॥ प्रतिस्किरेत् ॥ प्रतिस्किरतु ॥ प्रत्यस्किरत् ॥ प्रतिचस्कार इत्यादि प्रकार से ही होते हैं ॥

१६०–गॄ=निगरण, निगलना

गिरति, गिलति * गिरेत्, गिलेत् * गिरतु, गिलतु * अगिरत, अगिलत् * जगार, जगाल । जगरतुः, जगलतुः इत्यादि * गीर्यात्, गिल्यात् * गरिता, गरीता, गलिता, गलीता * गरिष्यति, गरीष्यति, गलिष्यति, गलीष्यति * अगरिष्यत्, अगलिष्यत्, अगरीष्यत्, अगलीष्यत् * अगारीत्, अगालीत् ॥

१६१–पृच्छ=पूछना, ज्ञीप्सा, जानने की इच्छा

पृच्छति * पृच्छेत् * पृच्छतु * अपृच्छत् * पप्रच्छ पप्रच्छतुः पप्रच्छुः । पप्रच्छिथ, पप्रष्ठ पप्रच्छथुः * प्रष्टवान् * प्रष्टा * प्रक्ष्यति * अप्रक्ष्यत् * अप्राक्षीत् अप्राष्टाम् अप्राक्षुः । अप्राक्षीः ॥

भाषानुवाद करो–

घृतं मृशति तदनु शुध्यति । अन्नं मीदति । अन्नं विना सीदति लोको-ऽनावृष्टौ । शेदुः शिरांसि रणे वीराणाम् । किरति सर्षपम्=सरसों को । उप-स्किरति कण्टकं पादम् । उपस्किरति माणवकं व्याघ्रः । प्रतिचस्करुर्वानरा आलम् । उरोविदारं (पेट फाड़ कर) प्रतिचस्करे नखैः । [आत्मनेपदप्रयो-गोऽपि दृश्यते] गिरति नक्रोबालम् । माणवकं पन्थानं पृच्छति । पृच्छ धातु के दो कर्म होने से द्विकर्मक कहाता है ॥

संस्कृतानुवाद करो–

जल को छुओ । क्षेत्र में बीज बखेरो । चित्त में मत कुढो । दुग्ध मत बखेरो । मित्र को मत मारो । तुम साधु हो । बन्धन काटो । सिंह वन्य पशुओं को मारता है और खाता है, तथा मनुष्य को भी । सर्प मण्डूक को निगलता है । गुरु से धर्म पूछो, इत्यादि ॥

इति परस्मैपदिनः । अथात्मनेपदिनः–

१६२–मृ (ङ्)=प्राणत्याग, मरना

इस धातु के रूप भी प्रथम ४ लकारों में आत्मनेपदस्थ होते हैं, आगे परस्मैपदस्थ । म्रियते * म्रियेत * म्रियताम् * अम्रियत * ममार मम्रतुः मम्रुः । ममर्थ * म्रियात् * मर्त्ता * मरिष्यति * अमरिष्यत् * लुङ् में भी आत्मनेपद होता है । जैसे–अमृत अमृषाताम् अमृषत । अमृथाः अमृषाथाम् अमृढ्वम् । अमृषि अमृष्वहि अमृष्महि ॥

१६३–पृ (ङ्)=व्यायाम, व्यापार, काम करना

यह धातु विशेष करके व्या (ङ्) पूर्वक रहता है। जैसे–व्याप्रियते * व्याप्रियेत * व्याप्रियताम् * व्याप्रियत * व्यापप्रे व्यापप्राते व्यापप्रिरे * व्यापृषीष्ट * व्यापर्त्ता * व्यापरिष्यते * व्यापरिष्यत * व्यापृत व्यापृषाताम् ॥

१६४—जुषी=प्रीति और सेवा करना

जुषते * जुषेत * जुषताम् * अजुषत * जुजुषे * जोषिषीष्ट * जोषिता जोषिष्यते * अजोषिष्यत * अजोषिष्ट अजोषिषाताम् अजोषिषत। अजोषिष्ठाः अजोषिषाथाम् इत्यादि ॥

१६५–(ओ) विजी=भय और चलना

प्रायः यह धातु "उत्" उपसर्गपूर्वक रहता है ॥ उद्विजते * उद्विजेत * उद्विजताम् * उदविजत * उद्विविजे * उद्विजिषीष्ट * उद्विजिता * उद्विजिष्यते * उदविजिष्यत * उदविजिष्ट उदविजिषाताम् उदविजिषत। उदविजिष्ठाः उदविजिषाथाम् इत्यादि ॥

भाषानुवाद करो

म्रियन्ते रोगिणः। व्याप्रियते वैश्यः। धर्मं जुषते। भार्यां जुषते। उद्विजते हृदयं दुरात्मनः। इत्यादि ॥

संस्कृत बनाओ

निर्धन अन्न विना मरते हैं। धनी रोगों से मरते हैं। मैं दिन और रात्रि में भी काम करता हूं। तुम सत्य को सेवन करो और मैं भी सेवन करूं। मेरा हृदय पाप से डरता है। इत्यादि ॥

इति तुदादिगणप्रकरणम्

—:*:—

अथ तिङन्ते रुधादिगणप्रकरणम्

तत्रोभयपदिनः–

१६६—रुधिर्=आवरण, छादन, रोकना, ढकना

लट्–रुणद्धि रुन्द्धः रुन्धन्ति। रुणत्सि रुन्द्धः रुन्द्ध। रुणद्मि रुन्ध्वः रुन्ध्मः ॥ रुन्द्धे रुन्धाते रुन्धते। रुन्त्से रुन्धाथे रुन्द्ध्वे। रुन्धे रुन्ध्वहे रुन्ध्महे * लिङ्–रुन्ध्यात् ॥ रुन्धीत * लोट्–रुणद्धु, रुन्द्धात् रुन्धाम्

रुन्धन्तु । रुन्धि, रुन्द्धात् रुन्द्धम् रुन्द्ध । रुणधानि रुणधाव रुणधाम ॥ रुन्द्धाम् रुन्धाताम् रुन्धताम् । रुन्त्स्व रुन्धाथाम् रुन्द्ध्वम् । रुणधै रुणधावहै रुणधामहै * लुङ्-अरुणत् अरुन्द्धाम् अरुन्धन् । अरुणत्, अरुणः अरुन्द्धम् अरुन्द्ध । अरुणधम् । अरुन्ध्व अरुन्ध्म ॥ अरुन्द्ध अरुन्धाताम् अरुन्धत । अरुन्द्धाः अरुन्धाथाम् अरुन्द्ध्वम् । अरुन्धि अरुन्ध्वहि अरुन्ध्महि * लिट्-रुरोध रुरुधतुः रुरुधुः । रुरोधिथ, रुरोद्ध रुरुधथः रुरुध । रुरोध रुरुधिव रुरुधिम ॥ रुरुधे रुरुधाते रुरुधिरे इत्यादि * आशीर्लिङ्-रुध्यात् ॥ रुत्सीष्ट * लुट्-रोद्धा । रोद्धा * लृट्-रोत्स्यति । रोत्स्यते * लृङ्-अरोत्स्यत् । अरोत्स्यत * लुङ्-अरौत्सीत् अरौद्धाम् अरौत्सुः । अरौत्सीः अरौद्धम् अरौद्ध । अरौत्सम् अरौत्स्व अरौत्स्म ॥ अथवा-अरुधत् अरुधताम् अरुधन् । अरुधः इत्यादि ॥ अरुद्ध अरुत्साताम् अरुत्सत । इत्यादि ॥

१६७-भिदिर्=विदारण, फाड़ना, चीरना

भिनत्ति भिन्तः भिन्दन्ति । भिनत्सि इत्यादि * भिन्ते भिन्दाते भिन्दते । भिन्त्से भिन्दाथे भिन्द्ध्वे । भिन्दे भिन्द्वहे भिन्द्महे * भिन्द्यात् । भिन्दीत * भिनत्तु, भिन्तात् भिन्ताम् भिन्दन्तु । भिन्धि, भिन्तात् भिन्तम् भिन्त । भिनदानि भिनदाव भिनदाम ॥ भिन्ताम् भिन्दाताम् भिन्दताम् । भिन्त्स्व भिन्दाथाम् भिन्द्ध्वम् । भिनदै भिनदावहै भिनदामहै * अभिनत् अभिन्ताम् अभिन्दन् । अभिनः, अभिनत् अभिन्तम् अभिन्त । अभिनदम् अभिन्द्व अभिन्द्म * अभिन्त अभिन्दाताम् अभिन्दत इत्यादि * बिभेद बिभिदतुः बिभिदुः । बिभेदिथ बिभिदथुः इत्यादि * बिभिदे बिभिदाते बिभिदिरे । बिभिदिषे इत्यादि * भिद्यात् । भित्सीष्ट * भेत्ता । भेत्ता * भेत्स्यति । भेत्स्यते * अभेत्स्यत् । अभेत्स्यत * अभैत्सीत् अभैत्ताम् अभैत्सुः । अभैत्सीः अथवा-अभिदत् इत्यादि * अभित्त अभित्सातां इत्यादि ॥

१६८-छिदिर्=द्वैधीकरण, छेदन, फोड़ना

छिनत्ति ॥ छिन्ते * छिन्द्यात ॥ छिन्दीत * छिनत्तु ॥ छिन्ताम् * अच्छिनत् ॥ अच्छिन्त * चिच्छेद ॥ चिच्छिदे * छिद्यात ॥ छित्सीष्ट * छेत्ता ॥ छेत्ता * छेत्स्यति ॥ छेत्स्यते * अच्छेत्स्यत् ॥ अच्छेत्स्यत * अच्छैत्सीत् अथवा-अच्छिदत् ॥ अच्छित्त अच्छित्सातां इत्यादि ॥

१६९-युजिर्=योग, जुड़ना

युनक्ति ॥ युङ्क्ते * युञ्ज्यात् ॥ युञ्जीत * युनक्तु ॥ युङ्क्ताम् इत्यादि ॥

१७०–रिचिर्=विरेचन, दस्त आना, ख़ालीकरना

रिणक्ति ॥ रिङ्क्ते * रिङ्क्ष्यात् ॥ रिङ्क्षीत * ररेच ॥ ररिचे इत्यादि ॥

१७१–विचिर्=पृथग्भाव, अलग होना

विनक्ति ॥ विङ्क्ते * विङ्क्ष्यात् ॥ विङ्क्षीत * विनक्तु ॥ विङ्क्ताम् * विवेच ॥ विविचे इत्यादि ॥

१७२–क्षुदिर्=संपेषण, पीसना, चूरा करना

क्षुणत्ति ॥ क्षुन्ते * क्षुन्द्यात् ॥ क्षुन्दीत * क्षुणत्तु ॥ क्षुन्ताम् * चुक्षोद इत्यादि

१७३–उच्छृदिर=दीप्ति और देवन=प्रकाश, चमकना और खेलना

उत् उपसर्गपूर्वक छृद धातु है। उच्छृणत्ति। उच्छृन्ते * उच्छृन्द्यात्। उच्छृन्दीत * उच्छृणत्तु। उच्छृन्ताम् * उदज्छृणत्। उदज्छृन्त * उच्चच्छर्द। उच्चच्छृदे * उच्छृद्यात्। उच्छर्दिषीष्ट * उच्छर्दिता। उच्छर्दिता * उच्छर्दिष्यति वा–उच्छर्त्स्यति * उदज्छर्दिष्यत् वा–उदज्छर्त्स्यत् * उदज्छृदत् वा उदज्छर्दीत् ॥

भाषानुवाद करो–

मार्गं रुरुधिरे दुष्टाः। वाचं रुणद्धि कुशलः। भिनत्ति जलं कमलम्। विभिदे भित्तिं चौरः। छिनत्ति पाशबन्धनम्। युनक्ति चित्तमीश्वरे। रिणक्ति स्थानं गृही। विनक्ति यती गृहात्। क्षुणत्ति मृदम्। उच्छृणत्ति सूर्यः बालो वा। तृणत्ति व्याघ्रः इत्यादि ॥

संस्कृतानुवाद करो

छिद्र को रोको। मोहजाल को तोड़ो। रज्जु (रस्सी) को काटो। मकान को ख़ाली करो। घर से पृथक् होता है। तड़ाग को खोदता है। तारा चमकती हैं। बालक खेलते हैं। इत्यादि ॥

१७४–(उत्) तृदिर्=हिंसा और अनादर

तृणत्ति। तृन्ते * तृन्द्यात्। तृन्दीत * तृणत्तु। तृन्ताम् * अतृणत्। अतृन्त * ततर्द ॥ ततृदे * तृद्यात् ॥ तर्दिषीष्ट * तर्दिता ॥ तर्दिष्यति * अतर्दिष्यत् * अतृदत, अतर्दीत् ॥ अतर्दिष्ट *

इत्युभयपदिनः

अथ परस्मैपदिनः-

१७५-कृती=वेष्टन, लपेटना

कृणत्ति इत्यादि ॥ चकर्त्त ॥ कृत्यात् ॥ कर्त्तिता ॥ कर्त्तिष्यति ॥ अकर्त्तिष्यत् ॥ अकर्त्तीत् ॥

१७६ । १७७-तृह, हिंसि=हिंसा, वध करना

तृणेढि तृण्ढः तृंहन्ति । तृणेक्षि तृण्ढः तृण्ढ । तृणेह्मि तृंह्वः तृंह्मः ॥ तृह्यात् ॥ तृणेढु, तृण्ढात् तृण्ढाम् तृंहन्तु । तृण्धि, तृण्ढात् तृण्ढम् तृण्ढ । तृणहानि तृणहाव तृणहाम ॥ अतृणेट् अतृण्ढाम् अतृंहन् । अतृणेट् अतृण्ढम् अतृण्ढ । अतृणहम् अतृंह्व अतृंह्म ॥ ततर्ह ॥ तृह्यात् ॥ तर्हिता ॥ तर्हिष्यति ॥ अतर्हिष्यत् ॥ अतर्हीत् ॥ हिनस्ति ॥ हिंस्यात् ॥ हिनस्तु ॥ अहिनत् ॥ जिहिंस ॥ हिंस्यात् ॥ हिंसिता ॥ हिंसिष्यति ॥ अहिंसिष्यत् ॥ अहिंसीत् ॥

१७८-उन्दी=क्लेदन, भिगोना, गीला करना

उनत्ति उन्त्तः उन्दन्ति । उनत्सि ॥ उन्द्यात् ॥ उनत्तु ॥ औनत् औन्ताम् औन्दन् । औनः औन्तम् औन्त । औनदम् औन्द्व औन्द्म ॥ उन्दाञ्चकार इत्यादि वा-उन्दामास इत्यादि वा-उन्दाम्बभूव इत्यादि ॥ उद्यात् ॥ उन्दिता ॥ उन्दिष्यति ॥ औन्दिष्यत् ॥ औन्दीत् ॥

१७९-अञ्जू=प्रकट होना, चिकनाना, इच्छा, गति

अनक्ति अङ्क्तः अञ्जन्ति ॥ अञ्ज्यात् ॥ अनक्तु, अङ्क्तात् अङ्क्ताम् अञ्जन्तु । अङ्ग्धि, अङ्क्तात् अङ्क्तम् अङ्क्त । अनजानि ॥ आनक् आङ्क्ताम् आञ्जन् । आनक् आङ्क्तम् आङ्क्त । आनजम् आञ्ज्व आञ्ज्म ॥ आनञ्ज आनञ्जतुः आनञ्जुः । आनञ्जिथ, आनङ्क्थ इत्यादि ॥ अज्यात् ॥ अञ्जिता, अङ्क्ता ॥ अञ्जिष्यति, अङ्क्ष्यति ॥ आञ्जिष्यत, आङ्क्ष्यत ॥ आञ्जीत् आञ्जिष्टाम् आञ्जिषुः ॥

१८०-तञ्चू=सङ्कोचन, सकोड़ना

तनक्ति ॥ तञ्च्यात् ॥ तनक्तु ॥ अतनक् ॥ ततञ्च ॥ तच्यात् ॥ तञ्चिता, तङ्क्ता ॥ तञ्चिष्यति, तङ्क्ष्यति ॥ अतञ्चिष्यत, अतङ्क्ष्यत ॥ अतञ्चीत् अताङ्क्षीत् ॥

१८१–(ओ) विजी=भय और कांपना

विनक्ति विङ्क्तः विञ्जन्ति ॥ विञ्जयात् ॥ विनक्तु ॥ अविनक् ॥ विवेज विविजतुः विविजुः । विविजिथ इत्यादि ॥ विज्यात् ॥ विजिता ॥ विजिष्यति ॥ अविजिष्यत् ॥ अविजीत् अविजिष्टाम् ॥

१८२–शिष् (लृ)=विशेषण, विशेष, वचना

शिनष्टि शिंष्टः शिंषन्ति ॥ शिंष्यात् ॥ शिनष्टु, शिंष्टात् शिंष्टाम् शिंषन्तु । शिंग्धि, शिंष्टात् शिंष्टम् शिंष्ट । शिनषाणि ॥ अशिनट् अशिंष्टाम् अशिंषन् ॥ शिशेष ॥ शिष्यात् ॥ शेष्टा ॥ शेक्ष्यति ॥ अशेक्षयत् ॥ अशिषत् ॥ इसी प्रकारः–

१८३–पिष् (लृ)=संचूर्णन, पीसना

१८४–भञ्जो=आमर्दन, भङ्ग करना, तोड़ना, फोड़ना

भनक्ति भङ्क्तः भञ्जन्ति । भनक्षि ॥ भञ्ज्यात् ॥ भनक्तु ॥ अभनक् ॥ बभञ्ज । बभञ्जिथ, बभङ्कथ ॥ भज्यात् ॥ भङ्क्ता ॥ भङ्क्ष्यति ॥ अभङ्क्ष्यत् ॥ अभाङ्क्षीत् अभाङ्क्ताम् अभाङ्क्षुः । अभाङ्क्षीः इत्यादि ॥

भाषानुवाद करो

कृणत्ति पुस्तकं छात्रः । तृणेढि बालं व्याघ्रः । हिनस्ति मृगान् व्याधः । उनत्ति वस्त्राणि । अनक्ति सौन्दर्यम् । अञ्जन्ति पयसा शिरः । अनक्तु विद्याम् । तनक्ति करं लुब्धः । विनक्ति रोगभीत्या लोकः । विञ्जन्ति वातेन वृक्षाः । शिनष्टि शिष्यं गुरुः । पिनष्टि गोधूमान् वराकी (बेचारी) । बभञ्ज रामो धनुर्जनकपुरे शिवस्य । इत्यादि ॥

संस्कृतानुवाद करो

बच्चों को बांधो । शत्रु को मारो । कपड़ा भिगोओ । स्वरूप मत दिखाओ । शिर को तैल से चिकनाओ । धन और कीर्त्ति को चाहो । ग्राम को चलो । रस्सी को सकोड़ो । मत डरो । मत कांपो । अपने को विद्या से विशेष करो । बुढ़िया चने पीसती है । लकड़ी तोड़ो । इत्यादि ॥

इति परस्मैपदिनः

अथात्मनेपदिनः-

१८५-भुज=पालन और अभ्यवहार=भोजन

यह धातु पालन अर्थ में परस्मैपदी है। जैसे—भुनक्ति * भुञ्जात् * भुनक्तु * अभुनक् * बुभोज * भुज्यात् * भोक्ता * भोक्ष्यति * अभोक्ष्यत्* अभौक्षीत् अभोक्ताम् इत्यादि॥ यह पालन अर्थ को छोड़ भोजन अर्थ में वा धातुओं के अनेकार्थ होने से अन्य किसी अर्थ में आत्मनेपदी रहता है। जैसे—भुङ्क्ते * भुञ्जीत * भुङ्क्ताम् * अभुङ्क्त * बुभुजे * भुक्षीष्ट * भोक्ता * भोक्ष्यते * अभोक्ष्यत * अभुक्त अभुञ्जाताम् अभुञ्जत इत्यादि॥

१८६-(ञि) इन्धी=दीप्ति, चमकना, प्रज्वलित होना

इन्धे * इन्धीत * इन्धाम् * ऐन्ध * इन्धाञ्चक्रे इन्धाञ्चक्राते * इन्धिषीष्ट इन्धिता * इन्धिष्यते * ऐन्धिष्यत * ऐन्धिष्ट॥

१८७-विद=विचारना

वित्ते * विन्दीत * वित्ताम् * अवित्त * विविदे * वित्सीष्ट * वेत्ता * वेत्स्यते * अवेत्स्यत * अवित्त अवित्साताम्॥

भाषानुवाद करो

महीं भुनक्ति भूपालः। ओदनं भुङ्क्ते बालः। इन्धीत वेद्यां समिधः। वित्ते वेदान् श्रोत्रियः इत्यादि॥

संस्कृतानुवाद करो

गृहस्थो! कुटुम्ब को पालो। धर्मार्जित अन्न को खाओ। इन्धन जलता है। सत्याऽसत्य को विचारो इत्यादि॥

इति रुधादिगणप्रकरणम्

अथ तिङन्ते तनादिगणप्रकरणम्

तत्रोभयपदिनः-

१८८-तनु=विस्तार, फैलाना

तनोति तनुतः तन्वन्ति। तनोषि तनुथः तनुथ। तनोमि तन्वः, तनुवः तन्मः, तनुमः॥ तनुते तन्वाते तन्वते। तनुषे तन्वाथे तनुध्वे। तन्वे

तनुवहे, तन्वहे तनुमहे, तन्महे * तनुयात् ॥ तन्वीत तन्वीयाताम् तन्वीरन्। तन्वीथाः * तनोतु, तनुतात् तनुताम् तन्वन्तु । तनु, तनुतात् तनुताम् तनुत । तनवानि तनवाव तनवाम ॥ तनुताम् तन्वाताम् तन्वताम् । तनुष्व * अतनोत् अतनुताम् अतन्वन् । अतनोः अतनुतम् अतनुत । अतनवम् अतन्व, अतनुव अतन्म, अतनुम ॥ अतनुत अतन्वाताम् अतन्वत । अतनुथाः अतन्वाथाम् अतनुध्वम् । अतन्वि अतनुवहि, अतन्वहि अतनुमहि, अतन्महि * ततान तेनतुः तेनुः । तेनिथ तेनथुः तेन । ततान, ततन तेनिव तेनिम ॥ तेने तेनाते * तन्यात् ॥ तनिषीष्ट * सनिता ॥ तनिता * तनिष्यति । तनिष्यते * अतनिष्यत् ॥ अतनिष्यत * अतानीत्, अतनीत् ॥ अतत, अतनिष्ट अतनिषाताम् अतनिषत । अतथाः, अतनिष्ठाः अतनिषाथाम् अतनिढ्वम् । अतनिषि अतनिष्वहि अतनिष्महि ॥

१८९–षणु=दान, देना

सनोति । सनुते * सनुयात् । सन्वीत * सनोतु । सनुताम् * असनोत् । असनुत * ससान। सेने * सन्यात्, सायात्। सनिषीष्ट * सनिता। सनिता * सनिष्यति । सनिष्यते * असनिष्यत् । असनिष्यत * असानीत्, असनीत् । असात, असनिष्ट असनिषाताम् असनिषत । असाथाः, असनिष्ठाः असनिषाथाम् इत्यादि ॥

१९०–क्षणु=हिंसा

क्षणोति इत्यादि * लिट्–चक्षाण चक्षणतुः चक्षणुः । चक्षणिथ ॥ चक्षणे चक्षणाते * क्षण्यात्। क्षणिषीष्ट * क्षणिता। क्षणिता * क्षणिष्यति। क्षणिष्यते * अक्षणिष्यत् । अक्षणिष्यत * अक्षणीत् अक्षणिष्टाम् ॥ अक्षत, अक्षणिष्ट इत्यादि ॥

१९१–क्षिणु=हिंसा, मारना

क्षिणोति इत्यादि । किन्ही के मत में क्षेणोति इत्यादि * चिक्षेण चिक्षिणतुः ॥ चिक्षिणे * क्षिण्यात् । क्षेणिषीष्ट * क्षेणिता । क्षेणिता * क्षेणिष्यति। क्षेणिष्यते * अक्षेणिष्यत् । अक्षेणिष्यत * अक्षेणीत् । अक्षित, अक्षेणिष्ट अक्षेणिषाताम् अक्षेणिषत । अक्षिथाः, अक्षेणिष्ठाः इत्यादि ॥

१९२–तृण=अदन, चरना, खाना

तृणोति वा तर्णोति इत्यादि * ततर्ण तृणतुः ॥ तृणे * तृण्यात् । तर्णिषीष्ट * तर्णिता । तर्णिता * तर्णिष्यति । तर्णिष्यते * अतर्णिष्यत् । अतर्णिष्यत * अतर्णीत् ॥ अतृत, अतर्णिष्ट । अतृथाः, अतर्णिष्ठाः ॥

१९३–(डु) कृ (ञ्)=करण, करना, बनाना

करोति कुरुतः कुर्वन्ति। करोषि कुरुथः कुरुथ। करोमि कुर्वः कुर्मः॥ कुरुते कुर्वाते कुर्वते। कुरुषे कुर्वाथे कुरुध्वे। कुर्वे कुर्वहे कुर्महे॥ कुर्यात्॥ कुर्वीत॥ करोतु, कुरुतात् कुरुताम् कुर्वन्तु। कुरु, कुरुतात् कुरुतम् कुरुत। करवाणि करवाव करवाम॥ कुरुताम् कुर्वाताम् कुर्वताम्। कुरुष्व कुर्वाथाम् कुरुध्वम्। करवै करवावहै करवामहै॥ अकरोत् अकुरुताम् अकुर्वन्। अकरोः अकुरुतम् अकुरुत। अकरवम् अकुर्व अकुर्म॥ अकुरुत अकुर्वाताम् अकुर्वत। अकुरुथाः अकुर्वाथाम् अकुरुध्वम्। अकुर्वि अकुर्वहि अकुर्महि॥ चकार चक्रतुः चक्रुः। चकर्थ॥ चक्रे चक्राते चक्रिरे॥ क्रियात्। कृषीष्ट॥ कर्त्ता। कर्त्तारौ॥ करिष्यति। करिष्यते॥ अकरिष्यत्। अकरिष्यत॥ अकार्षीत् अकार्ष्टाम् अकार्षुः। अकार्षीः अकार्ष्टम् अकार्ष्ट। अकार्षम् अकार्ष्व अकार्ष्म॥ अकृत अकृषाताम् अकृषत। अकृथाः अकृषाथाम् इत्यादि॥

सम् और परि उपसर्ग से परे "कृ" धातु को सुट् (स) आगम होता है भूषण और समवाय अर्थ में। जैसेः–

सम्+करोति=संस्करोति। परि+करोति=परिष्करोति॥

उप उपसर्ग से परे भी कृ धातु को सुट् आगम होता है प्रतियत्न, वैकृत, वाक्याध्याहार, भूषण और समवाय अर्थों में। जैसेः–प्रतियत्न में=उदकस्योपस्कुरुते=जल को गुणयुक्त करता है=अपगुण दूर करके गुणाधान करता है। वैकृत में–उपस्करोति अन्नम्=अन्न को विकृत करता है। उपस्कृतं ब्रूते=वाक्यों के अध्याहारपूर्वक उच्चारण करता है। उपस्कृता कन्या=भूषिता इत्यर्थः। उपस्कृता ब्राह्मणाः=ब्राह्मण इकट्ठे हैं॥

भाषानुवाद करो

तनोति वस्त्रं तन्तुवायः। सनोति दक्षिणां यजमानः। क्षणोति, क्षिणोति, क्षेणोति वा माणवकं व्याघ्रः। तृणवन्ति वने गावः। कुरुते घटं कुलालः॥

संकृतानुवाद करो

कपड़ा बुनो। अन्न दो। दुर्बल को मत मारो। गाय चरती है। इत्यादि॥

इत्युभयपदप्रकरणम्

अथात्मनेपदप्रकरणम्-

१९४-वनु=याचन, मांगना

वनुते इत्यादि १९८ के तुल्य ॥ ववने ववनाते ॥ वनिषीष्ट ॥ वनिता ॥ वनिष्यते ॥ अवनिष्यत ॥ अवत, अवनिष्ट अवनिषाताम् अवनिषत । अवथाः, अवनिष्ठाः इत्यादि ॥

१९५-मनु=अवबोधन, समझना, मानना

मनुते इत्यादि ॥ मेने मेनाते मेनिरे ॥ मनिषीष्ट इत्यादि १९४ के तुल्य है ॥

भाषानुवाद करो

वनुते विद्यार्थी । आत्मानं पण्डितं मनुते । इत्यादि ॥

संस्कृतानुवाद करो

भिक्षा मत मांगो । अर्थं समझो इत्यादि ॥

इति तनादिगणप्रकरणम्

—*—

अथ तिङन्ते क्र्यादिगणप्रकरणम्

१९६-(डु) क्री (ञ्)=द्रव्यविनिमय, ख़रीदना

क्रीणाति क्रीणीतः क्रीणन्ति क्रीणासि क्रीणीथः क्रीणीथ । क्रीणामि क्रीणीवः क्रीणीमः ॥ क्रीणीते क्रीणाते क्रीणते । क्रीणीषे क्रीणाथे क्रीणीध्वे । क्रीणे क्रीणीवहे क्रीणीमहे ॥ क्रीणीयात् । क्रीणीत इत्यादि ॥ क्रीणातु, क्रीणीतात् क्रीणीताम् क्रीणन्तु । क्रीणीहि, क्रीणीतात् क्रीणीतम् क्रीणीत । क्रीणानि क्रीणाव क्रीणाम ॥ क्रीणीताम् क्रीणाताम् क्रीणताम् । क्रीणीष्व क्रीणाथाम् क्रीणीध्वम् । क्रीणै क्रीणावहै क्रीणामहै ॥ अक्रीणात् अक्रीणीताम् । अक्रीणन् । अक्रीणाः अक्रीणीतम् अक्रीणीत । अक्रीणाम् अक्रीणीव अक्रीणीम ॥ अक्रीणीत अक्रीणाताम् अक्रीणत । अक्रीणीथाः अक्रीणाथाम् अक्रीणीध्वम् । अक्रीणि अक्रीणीवहि अक्रीणीमहि ॥ चिक्राय चिक्रियतुः चिक्रियुः । चिक्रेथ चिक्रियथुः चिक्रिय । चिक्राय, चिक्रय चिक्रिव चिक्रियिम । चिक्रिये चिक्रियाते चिक्रियिरे । चिक्रियिषे चिक्रियाथे चिक्रियिध्वे । चिक्रिये । चिक्रियिवहे चिक्रियिमहे ॥ क्रीयात् । क्रेषीष्ट ॥ क्रेता । क्रेता ॥ क्रेष्यति । क्रेष्यते ॥ अक्रेष्यत् । अक्रेष्यत ॥ अक्रैषीत् । अक्रेष्ट अक्रेषाताम् इत्यादि ॥

१९७–प्री (ञ्)=तर्पण, तृप्त करना प्रीति और इच्छा

प्रीणाति ॥ प्रीणीते * प्रीणीयात् ॥ प्रीणीत * प्रीणातु ॥ प्रीणीताम् * अप्रीणात् ॥ अप्रीणीत * पिप्राय ॥ पिप्रिये * प्रीयात् इत्यादि "क्री" के तुल्य है ॥ इसी प्रकारः–

१९८–श्री (ञ्)=पाक, पकाना ।

१९९–मी (ञ्)=हिंसा

इस धातु के प्रयोगों में न को ण हो जाता है, जब कि प्रादि उपसर्गस्थ रेफादिनिमित्त से परे हो । जैसे–प्रमीणाति । परिमीणाति इत्यादि ॥ लिट्–ममौ मिम्यतुः मिम्युः । ममिथ, ममाथ मिम्यथुः मिम्य । ममौ मिम्यिव मिम्यिम ॥ मिम्ये मिम्याते ॥ मीयात् । मासीष्ट ॥ माता । माता ॥ मास्यति मास्यते ॥ अमास्यत् । अमास्यत ॥ अमासीत् । अमास्त अमासाताम् ॥

२००–षि (ञ्)=बन्धन, बांधना

सिनाति । सिनीते ॥ सिनीयात् । सिनीत ॥ सिनातु । सिनीताम् ॥ असिनात् । असिनीत ॥ सिषाय सिष्यतुः सिष्युः । सिषेथ ॥ सिष्ये सिष्याते ॥ सीयात् । सेषीष्ट ॥ सेता । सेता ॥ सेष्यति । सेष्यते ॥ असेष्यत् । असेष्यत ॥ असैषीत् असैष्टाम् । असेष्ट असेषाताम् ॥

२०१–स्कु (ञ्)=आप्लवन, कूदना, उछलना

स्कुनाति । स्कुनीते ॥ स्कुनीयात् । स्कुनीत ॥ स्कुनातु । स्कुनीताम् ॥ अस्कुनात् । अस्कुनीत ॥ अथवा–स्कुनोति स्कुनुतः स्कुन्वन्ति इत्यादि स्वादिगण के तुल्य । लिट् चुस्कोव चुस्कुवतुः इत्यादि ॥ स्कूयात् । स्कोषीष्ट ॥ स्कोता इत्यादि ॥

२०२ । २०३ । २०४ । २०५–स्तन्भु, स्तुन्भु, स्कन्भु, स्कुन्भु=रोकना

ये ४ धातु परस्मैपदी सौत्र हैं । जैसेः–स्तभ्नाति स्तभ्नीतः ॥ स्तभ्नीयात् ॥ स्तभ्नातु, स्तभ्नीतात् स्तभ्नीताम् स्तभ्नन्तु । स्तभान, स्तभ्नीतात् स्तभ्नीतम् इत्यादि ॥ अस्तभ्नात् ॥ तस्तम्भ तस्तभतुः तस्तभुः । तस्तम्भिथ तस्तभथुः तस्तभ । तस्तम्भ तस्तम्भिव तस्तम्भिम ॥ स्तभ्यात् ॥ स्तम्भिता ॥ स्तम्भिष्यति ॥ अस्तम्भिष्यत् ॥ अस्तभत् अस्तभताम् वा–अस्तम्भीत् अस्त-

भिष्टाम् इत्यादि ॥ इसी प्रकार स्तुभ्नाति इत्यादि ॥ तुष्टुम्भ तुष्टुभतुः तुष्टुभुः इत्यादि ॥ तथा-स्कभ्नाति इत्यादि ॥ चस्कम्भ चस्कभतुः इत्यादि ॥ स्कुभ्नाति इत्यादि ॥ चुस्कुम्भ चुस्कुभतुः इत्यादि ॥

२०६-यु (ञ्)=बन्धन, बांधना

युनाति । युनीते ॥ युनीयात् । युनीत युनीयाताम् ॥ युनातु । युनीताम् अयुनात् । अयुनीत ॥ युयाव युयुवतुः युयुवुः । युयोथ, युयविथ युयुवथुः युयुव । युयाव, युयुव युयुविव युयुविम । युयुवे युयुवाते इत्यादि ॥ यूयात् । योषीष्ट ॥ योता इत्यादि ॥ अयौषीत् अयौष्टाम् अयौषुः । अयौषीः इत्यादि ॥ अयोष्ट अयोषाताम् ॥

२०७-क्रू (ञ्)=शब्द, बोलना, कूं २ करना

क्रूनोति इत्यादि ॥ चुक्राव चक्रुवतुः चुक्रुवुः । चुक्रविथ ॥ चुक्रुवे चुक्रुवाते ॥ क्रूयात् । क्रविषीष्ट ॥ क्रविता इत्यादि ॥ अक्रावीत् अक्राविष्टाम् ॥ अक्रविष्ट ॥

२०८-दॄ (ञ्)=हिंसा

दृणाति इत्यादि ॥ ददार ददरतुः । ददरे ददराते ॥ दीर्यात् । दरिषीष्ट ॥ दरिता, दरीता इत्यादि ॥ अदारीत् । अदरिष्ट ॥

२०९-द्रू (ञ्)=हिंसा

द्रूणाति इत्यादि ॥ दुद्राव । दुद्रुवतुः ॥ दुद्रुवे ॥ द्रूयात् । द्रविषीष्ट ॥ द्रविता इत्यादि ॥ अद्रावीत्, अद्रवीत । अद्रविष्ट ॥

२१०-पू (ञ्)=पवन, शोधन, शुद्ध करना

पुनाति इत्यादि ॥ पुपाव पुपुवतुः । पुपुवे ॥ पूयात् । पविषीष्ट ॥ पविता इत्यादि ॥

२११-स्तॄ (ञ्) =आच्छादन, ढकना

स्तृणाति इत्यादि ॥ तस्तार तस्तरतुः । तस्तरे ॥ स्तीर्यात् । स्तरिषीष्ट ॥ स्तरिता, स्तरीता इत्यादि ॥ अस्तारीत् । अस्तरिष्ट अस्तरिषाताम् इत्यादि वा-अस्तीर्ष्ट अस्तीर्षाताम् अस्तीर्षत इत्यादि ॥

२१२-कॄ (ञ्)=हिंसा

कृणाति इत्यादि ॥ चकार चकरतुः । चकरे ॥ आगे " दॄ " २०८ के तुल्य है ॥ इसी प्रकारः-

२१३–वृ (ञ्)=वरण, स्वीकार

वृणाति इत्यादि ॥ ववार ववरतुः इत्यादि । ववरे ववराते ॥ वृणीत् वरिषीष्ट, वृषीष्ट ॥ वरिता, वरीता । वरिता, वरीता ॥ वरिष्यति, वरीष्यति इत्यादि ॥ लुङ्–अवारीत् अवारिष्टाम् अवारिषुः । अवरिष्ट अवरिषाताम् वा–अवरीष्ट अवरीषाताम् वा–अवृष्ट अवृषाताम् इत्यादि ॥

२१४–धू (ञ्)=कम्पन, कांपना, हिलना

धुनाति । धुनीते ॥ धुनीयात् । धुनीत ॥ धुनातु । धुनीताम् ॥ अधुनात् । अधुनीत ॥ दुधाव दुधुवतुः । दुधुवे ॥ धूयात् । धविषीष्ट, धोषीष्ट ॥ धविता, धोता ॥ धविष्यति, धोष्यति ॥ अधविष्यत, अधोष्यत् ॥ अधौषीत् वा–अधावीत् अधाविष्टाम् । अधविष्ट, अधोष्ट ॥

२१५–ग्रह=उपादान, लेना, ग्रहण करना, पकड़ना

गृह्णाति । गृह्णीते ॥ गृह्णीयात् । गृह्णीत ॥ गृह्णातु, गृह्णीतात् गृह्णीताम् । गृह्णातु । गृहाण, गृह्णीतात् गृह्णीतम् इत्यादि ॥ अगृह्णात् । अगृह्णीत ॥ जग्राह जगृहतुः । जगृहे जगृहाते ॥ गृह्यात् । ग्रहीषीष्ट ॥ ग्रहीता । ग्रहीता ॥ ग्रहीष्यति । ग्रहीष्यते ॥ अग्रहीष्यत् । अग्रहीष्यत ॥ अग्रहीत् अग्रहीष्टाम् ॥ अग्रहीष्ट अग्रहीषाताम् अग्रहीषत । अग्रहीष्ठाः । इत्यादि ॥

भाषानुवाद करो

अन्नं क्रीणाति । फलानि विक्रीणीते । पितरौ प्रीणीतो बालम् । ओदनं श्रीणाति । मीनाति बको मीनान् । मिनाति रक्षकश्चौरम् । स्कुनोति स्कुनाति वा मणडूकस्तडागे । स्तभ्नाति खड्गम् । स्तुभ्नाति शत्रुहस्तं धीरः । स्कभ्नाति हस्तिनमङ्कुशेन । स्कुभ्नाति गां दण्डेन । युनाति पशून् । क्रुनन्ति श्वशावकाः (कुतिया के पिल्ले) । दृणाति सिंहोऽजम् । दूणाति व्याघ्रो गाम् पुनाति यज्ञधूमो गृहाणि सताम् । स्तृणन्ति यज्ञे कुशान् ऋत्विजः ॥ क्रुणन्ति पशून् शूराः संग्रामे । वृणाति कन्या युवानं पतिम् । धुनाति वृक्षान् वायुस्तीव्रः । गृह्णाति दक्षिणामाचार्यः । इत्यादि ॥

संस्कृतानुवाद करो

गोधूम ख़रीदो । सरसों बेचो । आचार्य को प्रसन्न करो । सूप (दाल) और भात पकाओ । मछली मत मारो । अन्य अदुष्ट प्राणियों को भी मत

मारो। दुष्टों को मारो। भोजनार्थ अन्न बांधो। गर्व से मत उछलो। खड्ग-प्रहार को रोको। शत्रु को हटाओ। घोड़े को थांभो। कूं कूं क्यों करते हो? शत्रु के वक्षःस्थल को फाड़ो। जल और वायु तथा गृह को शुद्ध करो। जलपात्र और घृतपात्र को ढको। शिर ढको। विना अपराध किसी को मत मारो। आचार्य का वरण करो। पांव मत हिलाओ। मज़बूत पकड़ो। इत्यादि॥

इत्युभयपदप्रकरणम्॥ अथ परस्मैपदप्रकरणम्-

२१६-कुष=निष्कर्ष, निकालना, दबाना, निचोड़ना

कुष्णाति इत्यादि॥ लोट्-मध्यमपुरुषैकवचन-कुषाण॥ लिट् चुकोष चुकुषतुः॥ कुष्यात्॥ कोषिता॥ कोक्ष्यति॥ अकोक्ष्यत्॥ अकोषीत्॥

२१७-अश=भोजन, खाना

अश्नाति इत्यादि॥ लोट्-मध्यमैकवचन-अशान॥ लिट्-आश अशतुः॥ अश्यात्॥ अशिता॥ अशिष्यति॥ आशिष्यत्॥ आशीत्॥

२१८-मुष=स्तेय, चुराना

मुष्णाति इत्यादि॥ लोट्-मध्यमैकवचन=मुषाण॥ मुमोष॥ मुष्यात्॥ मोषिता इत्यादि॥

इति परस्मैपदप्रकरणम्॥ अथात्मनेपदप्रकरणम्-

२१९-वृ (ङ्)=संभक्ति, सेवा करना

वृणीते॥ वृणीत॥ वृणीताम्॥ अवृणीत॥ वव्रे वव्राते॥ वरिषीष्ट॥ वरिता, वरीता॥ वरिष्यते, वरीष्यते॥ अवरिष्यत, अवरीष्यत॥ अवरिष्ट, अवरीष्ट, अवृत। अवृषाताम् इत्यादि॥

भाषानुवाद करो

कुष्णाति वस्त्रम् तिलान्वा। अश्नन्ति ब्राह्मणाः पायसम्। मुष्णन्ति तस्कराः परधनम्। वृणीते पतिं वधूः। इत्यादि॥

संस्कृतानुवाद करो

धोती निचोड़ो। सरसों से तैल निकालो। अभक्ष्य मत खाओ। किसी की वस्तु मत चुराओ। गुरु को सेवो। इत्यादि॥

इति क्र्यादिगणप्रकरणम्॥ ९॥

अथ तिङन्ते चुरादिगणप्रकरणम्

२२०–चुर=स्तेय, चुराना

चोरयति । चोरयते * चोरयेत् । चोरयेत * चोरयतु । चोरयताम् * अचोरयत् । अचोरयत * चोरयाञ्चकार चोरय ञ्चक्रतुः, चोरयामास चोरयामासतुः, चोरयाम्बभूव चोरयाम्बभूवतुः इत्यादि * चोरयात् । चोरयिषीष्ट * चोरयिता । चोरयिता * चोरयिष्यति । चोरयिष्यते * अचोरयिष्यत् । अचोरयिष्यत * अचूचुरत् । अचूचुरत ॥

२२१–कथ=बोलना, कहना, वाक्यप्रबन्ध

कथयति इत्यादि * आशीर्लिङ्-कथ्यात् * लुङ्-अचकथत् ॥ अचकथत शेषरूप " चुर " के तुल्य हैं ॥

२२२–गण=सङ्ख्या करना, गिनना

गणयति इत्यादि " कथ " के तुल्य है परन्तु लुङ् में अजीगणत् वा-अजगणत् । अजीगणत, अजगणत । इत्यादि दो २ रूप होते हैं ॥

भाषानुवाद करो–

पापः परधनं चोरयति । सत्यं कथयति धर्मात्मा । पराऽपराधान् न गणयन्ति साधवः । इत्यादि ॥

संस्कृतानुवाद करो–

किसी के वस्त्रादि मत चुराओ । सत्य कहो । रुपये गिनो । इत्यादि ॥

इति तिङन्ते चुरादिगणप्रकरणम्

दश गणाः समाप्ताः

अथ तिङन्ते णयन्तप्रक्रिया

कर्त्ता से कोई क्रिया कराना अर्थात् कर्त्ता को प्रेरणा करके कोई क्रिया कराना णयन्त का अर्थ है । जैसे–"घटो भवति" से "घटं भावयति"=घड़े को

हुआता अर्थात् बनाता है। "अश्वो घासं खादति" से "अश्वं घासं खादयति"= घोड़े को घास खिलाता है। इत्यादि ॥

इस णयन्त अवस्था में पूर्वावस्था का कर्त्ता प्रायः कर्म बन जाता है ॥

१–भू=होना ॥

"भवति" इत्यादि भ्वादिगण में कह आये हैं। यहां परस्मैपद में-भावयति भावयतः इत्यादि * भावयेत् भावयेताम् इत्यादि * भावयतु, भावयतात् इत्यादि * अभावयत् इत्यादि * भावयाञ्चकार, भावयामास, भावयाम्बभूव इत्यादि * भाव्यात् * भावयिता * भावयिष्यति * अभावयिष्यत् * अबीभवत् अबीभवताम् अबीभवन्। अबीभवः इत्यादि ॥ आत्मनेपद में भावयते * भावयेत * भावयताम् * अभावयत * भावयाञ्चक्रे * भावयिषीष्ट भावयिता * भावयिष्यते * अभावयिष्यत * अबीभवत अबीभवेताम् इत्यादि ॥

२–स्था=ठहरना ॥

तिष्ठति इत्यादि कह आये हैं। यहां-स्थापयति * स्थापयेत् इत्यादि भावयति आदि के तुल्य हैं। लुङ्-अतिष्ठिपत् ॥ अतिष्ठिपत इत्यादि ॥

३=घट=चेष्टा, बनाना

घटते इत्यादि भ्वादिगण में। यहां घटयति इत्यादि। लुङ्-अजीघटत् अजीघटत इत्यादि ॥

४–ज्ञप=ज्ञान, जानना ॥

चुरादिगणस्थ है। यहां-ज्ञपयति इत्यादि ॥ इसी प्रकार-आतयति * आतितत् ॥ आदयति * आदिदत् ॥ हावयति * अजीहवत् ॥ देवयति * अदीदिवत् ॥ सावयति * असूषुवत् ॥ तोदयति * अतूतुदत् ॥ रोधयति * अरूरुधत् ॥ तानयति * अतीतनत् ॥ क्राययति * आचक्रियत ॥ चोरयति * अचूचुरत् ॥ इत्यादि सब गणों से सब धातुओं के रूप समझने चाहियें ॥

स्मरण रहे कि इस पुस्तक में उस २ गण के सब धातु नहीं लिखे, किन्तु धातु पाठ के बहुत से ऐसे धातु भी हैं जो इस पुस्तक में नहीं लिखे, परन्तु अपने अपने गण के मुख्य धातु के प्रायशः तुल्य हैं और जिन २ में कुछविशेष है वह व्याकरण को इस से अगली बड़ी पुस्तकों के पढ़ने से समझ में आवेगा, परन्तु लघुकौमुदी में जितने धातु दिये हैं प्रायः वे सब हमने भी यहां लिख दिये हैं ॥

उदाहरणानि-घटं भावयति=घड़े को बनाता है। साधुं गृहे स्थापयति=साधु को घर में ठहराता है। घटयति कम्बलम्=कम्बल को बनाता है। अर्थं ज्ञापयति=अर्थ को जतलाता है। मिष्टमादयति=मिठाई खिलाता है। दापयति दक्षिणाम्=दक्षिणा दिलाता है। देवयति बालकान्=बालकों को खेलाता है। सोमं सावयति=सोम का अर्क खिंचवाता है। तोदयति रथी सारथिना-ऽश्वान्=रथी, सारथि से घोड़ों को व्यथित कराता है। रोधयति भृत्यैः पथिकान्=नौकरों से पथिकों को रुकवाता है। यज्ञार्थमासनानि तानयति=यज्ञार्थ आसन बिछवाता है। सर्षपं क्राययति=सरसों ख़रीदवाता है। चोरयति खलः परधनम्=दुष्ट पराये धन को चुरवाता है इत्यादि॥

इति णयन्तप्रक्रिया



अथ तिङन्ते सन्नन्तप्रक्रिया

जब धातु के अर्थ में इच्छार्थ पाया जावे तब सन्नन्त का प्रयोग होता है। जैसे भवति से-बुभूषति=होना चाहता है इत्यादि॥

१-पठ=पढ़ना॥

पिपठिषति * पिपठिषेत * पिपठिषतु * अपिपठिषत् * पिपठिषाञ्चकार * पिपठिष्यात् * पिपठिषिता * पिपठिषिष्यति * अपिपठिषिष्यत् * अपिपठिषीत् इत्यादि॥

२-अद (घस्लृ)=भक्षण। जिघत्सति इत्यादि॥

३-कृ (डु) करना॥

चिकीर्षति * चिकीर्षेत् * चिकीर्षतु * अचिकीर्षत् * चिकीर्षाञ्चकार इत्यादि॥

४-भू=होना॥

बुभूषति * बुभूषेत् * बुभूषतु * अबुभूषत् * बुभूषाञ्चकार * बुभूष्यात् इत्यादि। इसी प्रकार-जुहूषति। दिदेविषति। सुषूषति। तुतुत्सति। सुस्रुत्सति। तितांसति, तितंसति वा तितनिषति। चिक्लेषति। चुचारयिषति इत्यादि जानो॥

उदाहरणानि-पिपठिषति वेदान् श्रोत्रियः=श्रोत्रिय (वेदपाठी) वेदों को पढ़ना चाहता है। चिकीर्षति गृहं गृही=गृहस्थ घर को बनाना चाहता

है । छात्रः पण्डितो बुभूषति=विद्यार्थी पण्डित होना चाहता है । जिघत्सति मिष्टं ब्राह्मणः=ब्राह्मण मिठाई खाना चाहता है । पान्थो ग्रामं जिगमिषति= पथिक ग्राम को जाना चाहता है । जुहूषति दक्षिणां यजमानः=यजमान दक्षिणा को देना चाहता है । जुहूर्षति हव्यमग्निः=अग्नि हव्य को खाना (फूंकना) चाहता है । बाला दुद्यूषन्ति, दिदेविषन्ति वा=बालक खेलना चाहते हैं । अहं गुडूचीं लुलूषामि=मैं गिलोय का अर्क खींचना चाहता हूं । तुतुत्सति खलः साधून्=दुष्ट सत्पुरुषों को दुःख देना चाहता है । शूरः शत्रुं रुरुत्सति=शूर वीर शत्रु को रोकना चाहता है । तितांसति, तितंसति वा तितनिषति जालं वञ्चकः=ठग जाल को फैलाना चाहता है । व्यापारी चिक्रेषति गोधूमराशिम्=व्यापारी गोधूम की ढेरी को ख़रीदना चाहता है । चुचोरयिषति चौरः परधनानि=चोर पराये धनों को चुराना चाहता है । इत्यादि ॥ प्रायः इसी प्रकार के अन्य धातुओं के रूप जानो ॥

इति सन्नन्तप्रक्रिया

अथ तिङन्ते यङन्तप्रक्रिया

जो धातु एक स्वर वाले और व्यञ्जनादि हैं उन के अर्थ में जब अतिशयता वा वारंवार का अर्थ रहता है तब यङन्त प्रयोग होता है । जैसेः— बोभूयते=बहुतायत से होता है वा वारंवार होता है । इत्यादि ॥

बोभूयते * बोभूयेत * बोभूयताम् * अबोभूयत * बोभूयाञ्चक्रे * बोभूयिषीष्ट * बोभूयिता * बोभूयिष्यते * अबोभूयिष्यत * अबोभूयि ष्टअबोभूयिषाताम् इत्यादि ॥

जिन धातुओं का "गति" अर्थ है उन का यङन्त प्रयोग कुटिलता अर्थ में होता है । क्रियासमभिहार (एक दूसरे का काम करना) में नहीं। जैसेः—

वाव्रज्यते * वाव्रज्येत * वाव्रज्यताम् * अवाव्रज्यत * वाव्रजाञ्चक्रे * वाव्रजिषीष्ट * वाव्रजिता * वाव्रजिष्यते * अवाव्रजिष्यत * मुवाव्रजिष्ट ॥

वरीवृत्यते * वरीवृत्येत * वरीवृत्यताम् * अवरीवृत्यत * वरीवृताञ्चक्रे वरीवृतिषीष्ट * वरीवृतिता * वरीवृतिष्यते * अवरीवृतिष्यत * अवरीवृतिष्ट ॥

नरीनृत्यते * नरीनृत्येत * नरीनृत्यताम् * अनरीनृत्यत * नरीनृताञ्चक्रे * नरीनर्त्तिषीष्ट * नरीनर्त्तिता । इत्यादि ॥

जरीगृह्यते इत्यादि ॥ जरीगृह्यास्त्रुके ॥ जरीगृहिषीष्ट ॥ जरीगृहिता इत्यादि ॥ इसी प्रकार:-

जङ्घन्यते । जोहूयते । देदीव्यते । सेषृयते । सोतुद्यते । रोरुध्यते । तन्तन्यते । चेक्रीयते । चोचूर्यते इत्यादि जानो ॥

उदाहरणानि वर्षासु बोभूयते मेघः=वर्षा में मेघ बारंबार वा बहुतायत से हुवा करता है। वाव्रज्यतेऽश्वः=घोड़ा तिरछा चलाकरता है। वरीवृत्यतेऽन्नम्-अन्न बहुतायत से वर्त्तमान है। नरीनृत्यते गणिका=रण्डी बार २ नाचती है। अजरीगृह्यिष्ट चौरं रक्षकः=बारंबार पकड़ा चोर को चौकीदार ने। जङ्घन्यते पक्षिणो वधिकः=वधिक पक्षियों को बहुतायत से मारता है। जोहूयते दानं दाता=दाता बहुतायत से दान देता है। जोहूयते घृतमग्निः=अग्नि घृत को बहुतायत से जलाता है। अक्षैर्देदीव्यन्ते धूर्ताः=दुष्ट बहुतायत से पाशों से खेलते हैं। सेषृयते ऋत्विक् सोमम्=ऋत्विज् (यज्ञकर्त्ता) सोम का अधिकता से अर्क खींचता है। तोतुद्यतेऽश्वान् सारथिः=सारथिमैन घोड़ों को बहुत वा बारंबार बींधता है=चाबुक मारता है। दस्यवो मार्गं रोरुध्यन्ते=डाकू रास्ता बहुत रोकते हैं। चेक्रीयन्ते वणिजोऽन्नम्=बनिये नाज बहुत ख़रीदते हैं। चोचूर्यन्तेऽमावस्यायां चौराः=चोर अमावस में बहुत चुराते हैं इत्यादि॥

इति यङन्तप्रक्रिया

अथ निङन्ते यङ्लुक्प्रक्रिया

यङन्त के ही अर्थ में दूसरे प्रकार के प्रयोग यङ्लुक् के भी होते हैं ॥

भू=होना

बोभवीति, बोभोति बोभूतः बोभुवति । बोभवीषि, बोभोषि बोभूथः बोभूथ । बोभवीमि, बोभोमि बोभूवः बोभूमः ॥ बोभूयात् बोभूयाताम् बोभूयुः इत्यादि ॥ बोभवीतु, बोभोतु, बोभूतात् बोभूताम् बोभुवतु । बोभूहि, बोभूतात् बोभूतम् बोभूत । बोभवानि ॥ अबोभवीत्, अबोभोत् अबोभूताम् अबोभुवुः । अबोभवीः, अबोभोः, अबोभूतम् अबोभूत । अबोभवम् अबोभूव अबोभूम ॥ बोभवाञ्चकार, बोभवामास, बोभवाम्बभूव ॥ बोभूयात् बोभूयास्ताम् ॥ बोभविता ॥ बोभविष्यति ॥ अबोभविष्यत् ॥ अबोभवीत्, अबोभोत् अबोभूताम् अबोभूवुः। अबोभवीः, अबोभोः इत्यादि ॥

इसी प्रकार-जङ्घनीति, जङ्घन्ति । जोहवीति, जोहोति । देदेवीति । मोषवीति, मोषोति । तोतोदीति, तोतोत्ति । रोरोधीति, रोरोद्धि । तन्तनीति, तन्तन्ति । चेक्रयीति, चेक्रेति । चोचोरीति इत्यादि जानो ॥

उदाहरण यङन्त के तुल्य हैं ॥

इति यङ्लुक्प्रक्रिया

अथ तिङन्ते नामधातुप्रक्रिया

नामधातु उसे कहते हैं जो प्रथम प्रातिपदिक (संज्ञा) हो और फिर विशेष क्रियार्थ के योग में धातु के समान तिङन्त प्रयुक्त होवे ॥

१-जिन शब्दों का वर्णन प्रथमा द्वितीयादि विभक्तियों सहित तृतीय पुस्तक में कर आये हैं, वे और उन के सदृश अन्य प्रातिपदिक जो सुबन्त दशा में थे, जब कि अपने लिये इच्छा क्रिया के कर्म हों तब उन के इस प्रकार रूप होते हैं । जैसे-"अपने लिये पुत्र की इच्छा करना" यहां इच्छा का कर्म पुत्र है तो पुत्र शब्द से क्यच् प्रत्यय लगाकर-

पुत्रीयति पुत्रीयतः इत्यादि ॥ पुत्रीयेत् पुत्रीयेताम् ॥ पुत्रीयतु ॥ अपुत्रीयत् ॥ पुत्रीयाञ्चकार, पुत्रीयामास, पुत्रीयाम्बभूव ॥ पुत्रीय्यात् ॥ पुत्रीयिता ॥ पुत्रीयिष्यति ॥ अपुत्रीयिष्यत् ॥ अपपुत्रीयीत् अपुत्रीयिषीष्टाम् इत्यादि ॥ राजीयति ॥ राजीयेत् ॥ राजीयतु ॥ अराजीयत् ॥ राजीयाञ्चकार इत्यादि ॥ वाक्यति ॥ वाक्येत् ॥ वाक्यतु ॥ अवाक्यत् ॥ वाक्याञ्चकार ॥ वाक्य्यात्, वाक्यात् ॥ वाक्यिता, वाचिता इत्यादि ॥

गीर्यति ॥ पूर्यति ॥ दिव्यति ॥ गीर्यिता, गीरिता ॥ पूर्यिता, पूरिता ॥ दिव्यिता, दिविता इत्यादि ॥

समिध्यति ॥ समिध्येत् इत्यादि ॥ समिध्यिता, समिधिता ॥ समिध्यिष्यति, समिधिष्यति इत्यादि ॥

२-पूर्वोक्त अर्थ में काम्यच् प्रत्यय भी लगाते हैं । जैसे-पुत्रकाम्यति ॥ राजकाम्यति ॥ वाक्काम्यति ॥ गीःकाम्यति ॥ पूःकाम्यति ॥ समित्काम्यति ॥

पुत्रीयति मे पत्नी=मेरी पत्नी अपने लिये पुत्र चाहती है । राजीयन्ति प्रजाः=प्रजायें अपने लिये राजा चाहती हैं । वाक्यति मूकः=गूंगा अपने लिये (वाच्) वाणी चाहता है । गीर्यति माणवकः-बालक अपने लिये (गिर)

वाणी चाहता है। पूर्यन्ति कृषकाः=किसान लोग अपने लिये (पुर्) नगरी चाहते हैं। मुमुक्षुर्न दिव्यति=मोक्ष का इच्छुक स्वर्ग (दिव्) नहीं चाहता है॥ समिध्यति अग्निः=अग्नि अपने लिये लकड़ी (समिध्) चाहता है। दशरथः पुत्रकाम्याञ्चकार इयाज चाश्वमेधेन=दशरथ ने अपने लिये पुत्र चाहा था और अश्वमेध से यजन किया था। समित्काम्यन्ति अग्निहोत्रिणः=अग्निहोत्री लोग समिध् चाहते हैं। पूःकाम्यन्ति दरिद्राः=दरिद्र लोग पुरी चाहते हैं। राजकाम्यन्ति सम्पन्नाः=सम्पन्न लोग राजा होना चाहते हैं। बुद्धिं काम्येत छात्रः=विद्यार्थी बुद्धि को चाहे इत्यादि॥

३-आचरण अर्थ में जिस से उपमा दी जावे उस (उपमानवाचक शब्द) कर्म से भी क्यच् प्रत्यय लगाते हैं। जैसे-"विद्यार्थी को पुत्र के समान आचरण करता है" इस अर्थ में पुत्रीयति इत्यादि। दुग्धीयति जलम्=जल को दूध के तुल्य आचरण करता (वर्त्तता) है। पित्रीयति आचार्यम्=आचार्य को पिता के सदृश आचरण करता है॥ अमृतीयति मिष्टम्=मिठाई को अमृत के समान आचरण करता है॥

४-प्रातिपदिकमात्र से आचारार्थ में क्विप् प्रत्यय लगाते हैं। जैसे-कृष्णति॥ कृष्णेत्॥ कृष्णतु इत्यादि॥ स्वति॥ इदमति॥ राजानति॥ पथीनति इत्यादि॥ कृष्णन्ति कृष्णभक्ताः=कृष्णभक्त कृष्ण के तुल्य आचरण करते हैं। रामति रामभक्तः=रामभक्त राम के तुल्य आचरण करता है। स्वन्ति परकीयाः=पराये लोग अपने (स्व) सा आचरण करते हैं। राजानति दस्युः=डाकू राजा के सा आचरण करता है। पथीनति जलम्=पानी मार्ग सा जान पड़ता है। इत्यादि॥

५-"कष्ट के लिये उद्योग करना" अर्थ में कष्ट शब्द से क्यङ् प्रत्यय लगाते हैं। जैसेः-कष्टायते * कष्टायेत * कष्टायताम् * अकष्टायत * कष्टायाञ्चक्रे * कष्टायिषीष्ट * कष्टायिता * कष्टायिष्यते * अकष्टायिष्यत * अकष्टायिष्ट॥ कष्टायते पापी=पापी कष्ट के लिये उद्योग करता है॥

६-शब्द, वैर, कलह, अभ्र, कण्व और मेघ शब्दों से "करने" अर्थ में क्यङ् प्रत्यय लगाते हैं। जैसेः-शब्दायते=शब्द करता है। वैरायते=वैर करता है। कलहायते=कलह करता है। इत्यादि॥

७-करने और कहने अर्थ में कर्मवाचक प्रादिपदिक से णिच् प्रत्यय लगाते हैं। जैसे-घटयति=घड़े को बनाता है वा कहता है। इत्यादि ॥

इति नामधातुप्रक्रिया

—:*:—

अथ कण्ड्वादिप्रक्रिया

कण्डू (ऊ) गात्रविघर्षण, खुजलाना

कण्डूयति। कण्डूयते * कण्डूयेत्। कण्डूयेत * कण्डूयतु। कण्डूयताम् * अकण्डूयत्। अकण्डूयत * कण्डूयाञ्चकार। कण्डूयाञ्चक्रे * कण्डूय्यात्। कण्डूयिषीष्ट * कण्डूयिता २ * कण्डूयिष्यति। कण्डूयिष्यते * अकण्डूयिष्यत्। अकण्डूयिष्यत * अकण्डूयीत्। अकण्डूयिष्ट * इत्यादि ॥

कण्डूयन्ति पशवो भित्त्या=पशु दीवार से खुजाते हैं इत्यादि ॥

मन्तु=अपराध करना

मन्तूयति इत्यादि ५२ धातु, धातुपाठान्तर्गत कण्ड्वादिगण में लिखे हैं उन सब के रूप इसी प्रकार हैं ॥

इति कण्ड्वादिप्रक्रिया

—:*:—

अथात्मनेपदप्रक्रिया

क्रिया के अदल बदल (विनिमय) अर्थ में आत्मनेपद होता है ॥

व्यलुनते कृषकाः=कृषक लोग परस्पर अदला बदली से काटते हैं अर्थात् वह उस का और वह उस का काटता है। व्यतिपाठयन्ते छात्राः=विद्यार्थी परस्पर पढ़ाते हैं ॥

गति और हिंसार्थक धातुओं से उक्तार्थ में आत्मनेपद नहीं होता। व्यतिगच्छन्ति पथिकाः=मुसाफ़िर एक दूसरे के मार्ग को अदल बदल कर जाते हैं। यहां आत्मनेपद न हुवा। ऐसे ही=व्यतिघ्नन्ति दुरात्मानः=पापी एक दूसरे को वध करते हैं। इत्यादि ॥

नि उपसर्ग में आगे "विश" धातु से आत्मनेपद होता है। निविशते= वह प्रवेश करता है। इत्यादि ॥

* परि, वि और अव उपसर्गों से आगे " क्री " धातु से आत्मनेपद होता है। परिक्रीणीते=मोल लेता है। विक्रीणीते=बेचता है। अवक्रीणीते=ख़रीदता है। इत्यादि ॥

* वि और परा उपसर्गों से आगे " जि " धातु से आत्मनेपद होता है। विजयते=जीतता है। पराजयते=हारता है ॥

* सम्, अव, प्र और वि उपसर्गों से परे "स्था" धातु से आत्मनेपद होता है। संतिष्ठते=सरता है। अवतिष्ठते=ठहरता है। प्रतिष्ठते=उज्जत पाता है॥ विनिष्ठते=विचलता है। उपसर्ग के योग से प्रायः धातु का अर्थ अन्य हो जाता है॥

* छिपाने अर्थ में " ज्ञा " धातु से आत्मनेपद होता है। शतमपजानीते=शत १००) को छिपाता है ॥

* अकर्मक ज्ञा धातु से भी आत्मनेपद होता है। सर्पिषो जानीते=घृत (उपाय) से प्रवृत्त होता है। यहां ज्ञा धातु का कर्म कोई नहीं, इस से अकर्मक है ॥

* तृतीयान्त पद के साथ चर धातु से आत्मनेपद हो, जब कि सम् उपसर्ग पूर्व हो। रथेन सञ्चरते=रथ के साथ चलता है ॥

* सम् उपसर्ग से परे दा (ण्) धातु से आत्मनेपद हो, यदि तृतीयान्त पद का योग हो और वह तृतीया विभक्ति, चतुर्थी विभक्ति के अर्थ में हो। दास्या संयच्छते कामी=कामी पुरुष दासी के लिये देता है ॥

* सन्नन्त प्रक्रिया में धातु से वही पद होता है जो कि पूर्व (दश गणों में) कह आये हैं। अर्थात् परस्मैपदी धातु से परस्मैपद, आत्मनेपदी से आत्मनेपद। जैसे 'भू' धातु परस्मैपदी है उस से सन्नन्त से भी "बुभूषति" यह परस्मैपद हुवा तथा 'एध' धातु आत्मनेपदी है उस से सन्नन्त से भी "एदिधिषते" यह आत्मनेपद हुवा। नि पूर्वक 'विश' धातु आत्मनेपदी है तो " निविविक्षते" यह सन्नन्त भी आत्मनेपदी रहा ॥

* कृञ् धातु से आत्मनेपद होता है, गन्धन, अवक्षेपण, सेवन, साहसिक्य प्रतियत्न, प्रकथन और उपयोग अर्थों में। जैसे- गन्धन=चुगली करना। सूत्कुरुते=चुगली करता है। अवक्षेपण=धमकाना। श्येनो वर्त्तिकामुत्कुरुते उत्सेयतीत्यर्थः। हरिमुपकुरुते सेवत इत्यर्थः। साहसिक्य=बलात्कार=ज़बर्दस्ती। परदारान् प्रकुरुते दुष्टः=परस्त्रियों को बलात्कार करता है दुष्ट। प्रतियत्न=

सुधारना। एधोदकस्योपस्कुरुते=इन्धन पानी को सुधारता है। कथां प्रकुरुते=कथा को कहता है। शतं प्रकुरुते=सौ (धर्मार्थ) लगाता है॥

इत्यात्मनेपदप्रक्रिया

अथ तिङन्ते परस्मैपदप्रक्रिया—

* अनु और परा उपसर्ग से परे कृञ् धातु से परस्मैपद होता है। अनुकरोति=नक़ल करता है। पराकरोति=दूर करता है॥

* अभि, प्रति और अति से परे विश धातु से परस्मैपद होता है। अभिक्षिपति। प्रतिक्षिपति। अतिक्षिपति॥

* प्र से परे "वह" धातु से परस्मैपद होता है। प्रवहति=बहता है॥

* परि से परे "मृष" धातु से परस्मैपद होता है। परिमृषति=सहता है॥

* वि, आ (ङ्) उप और परि से परे " रम " धातु से परस्मैपद होता है। विरमति=थमता है। आरमति। परिरमति। उपरमति॥

इति परस्मैपदप्रक्रिया

अथ तिङन्ते भावकर्मप्रक्रिया

* ति तः आदि प्रत्ययों के साथ भाव और कर्म एकार्थ हों तो धातु से आत्मनेपद होता है॥

प्रथम दश गणों में जो रूप लिखे हैं, वे कर्तृवाच्य हैं। जैसे—गच्छति देवदत्तः=देवदत्त जाता है। यहां जाता है का एकार्थ देवदत्त से है और देवदत्त गति क्रिया का कर्त्ता=जाने वाला है, इस लिये 'गच्छति' यह रूप कर्तृवाच्य हुवा। इसी प्रकार-छात्रो वेदं पठति=विद्यार्थी वेद को पढ़ता है। यहां पढ़ता है का एकार्थ छात्र से है अर्थात् पढ़ता है, कौन पढ़ता है? छात्र पढ़ता है और छात्र पठ क्रिया का कर्त्ता=पढ़ने वाला है, इस लिये 'पठति' यह कर्तृवाच्य रूप हुवा, परन्तु जब पठ धातु का कर्मवाच्य रूप बनायेंगे तब "वेदः पठ्यते छात्रेण" ऐसा होगा। अर्थात् " छात्र से वेद पढ़ा जाता है "। पढ़ा जाता है। क्या पढ़ा जाता है। वेद पढ़ा जाता है और वेद पठ क्रिया का कर्म जो पढ़ा जाता है, वह है, इस लिये 'पठ्यते' यह कर्मवाच्य रूप हुवा॥

क्रिया का करने वाला कर्त्ता, जो काम किया जाय वह कर्म और काम करना व होना आदि भाव कहलाता है॥

भाव-जैसे " अहं तिष्ठामि=मैं ठहरा हूं " यह कर्तृवाच्य है । अब इस को भाववाच्य बनाना हो तब " मया स्थीयते=मुझ से ठहरा जाता है " यहां ठहरा जाता है । यह क्रिया ही अपना वाच्य है । इत्यादि ॥

* प्रायः अकर्मक धातुओं (होना, बैठना, बसना, रहना, ठहरना, खेलना, फूलना, हंसना, हर्ष आदि अर्थ वाले जिन का कर्म नहीं होता) से भाववाच्य रूप बनते हैं और सकर्मक धातुओं (जाना, खाना, शोचना, पढ़ना, मारना, फूंकना आदि अर्थ वाले जिन का कर्म होता है) से कर्मवाच्य रूप होता है । इन्हीं को कर्त्ता में प्रत्यय, भाव में प्रत्यय और कर्म में प्रत्यय है, इस प्रकार कहा करते हैं ॥

इस भावकर्मप्रक्रिया में वे रूप लिखे जायंगे जो भाव में प्रत्यय वा कर्म में प्रत्यय लगाकर बनते हैं । जैसेः—

भू-भूयते ॥ भूयेत ॥ भूयताम् ॥ अभूयत ॥ बभूवे ॥ भाविषीष्ट, भविषीष्ट ॥ भाविता, भविता ॥ भाविष्यते, भविष्यते ॥ अभाविष्यत, अभविष्यत ॥ अभावि ॥

क्योंकि धातु का अर्थ जो क्रिया वा भाव है उस में द्विवचन और बहुवचन नहीं । इस लिये परिशेष से एकवचन ही होता है और मध्यमपुरुष तथा उत्तम पुरुष भी नहीं होते । इस लिये परिशेष से प्रथमपुरुष ही होता है, अन्य नहीं ॥

अनु उपसर्ग पूर्व लगने से भू धातु का अर्थ अनुभव करना हो जाता है, इस लिये " अनुभू " यह सकर्मक रहता है । अनुभूयते अनुभूयेते अनुभूयन्ते । अनुभूयसे इत्यादि ॥ अनुभूयेत अनुभूयेयाताम् अनुभूयेरन् इत्यादि ॥ अनुभूयताम् अनुभूयेताम् अनुभूयन्ताम् इत्यादि ॥ शेष रूप अपने आप समझने चाहियें ॥ यहां सकर्मक होने से कर्म में एकत्व, द्वित्व और बहुत्व होते हैं । युष्मद् और अस्मद् भी कर्म (अवस्था में) वाच्य रहते हैं, इस लिये तीनों पुरुष और तीनों वचन होकर सब रूप होते हैं । जैसे-भूयते पण्डितेन= पण्डित से हुवा जाता है । यह भाववाच्य होने से एक ही प्रयोग होता है । और सुखमनुभूयते धनिना=धनी से सुख भोगा जाता है । त्वमनुभूयसे राज्ञा= तू राजा से आज्ञ मायां जाता है । अहमनुभूये सभया=मैं सभा से अनुभव किया जाता हूं इत्यादि । ऐसे ही द्विवचन और बहुवचन समझो ॥

णिजन्त भू धातु से=भाव्यते ॥ भाठयेत ॥ भाव्यताम् ॥ अभाव्यत ॥ भावयाञ्चक्रे, भावयामासे, भावयाम्बभूवे ॥ भाविषीष्ट । भाविता ॥ भाविष्यते ॥ अभाविष्यत ॥ अभावि अभावयिषाताम् अभावयिषत । अभावयिष्ठाः अभावयिषाथाम् इत्यादि ॥

भाठ्येते घटौ कुलालेन=कुम्हार से दो घड़े बनाये जाते हैं। भाव्यसे त्वं पण्डितो गुरुणा=गुरु से तू पण्डित बनाया जाता है। भाठ्येऽहं निपुणः शिक्षकेण=शिक्षक से मैं निपुण बनाया जाता हूं। इत्यादि॥

अद्यतन भू धातु से-अबुभूष्यते॥ बुभूष्येत॥ बुभूष्यताम्॥ अबुभूष्यत॥ बुभूषाञ्चक्रे॥ बुभूविषीष्ट। बुभूषिता॥ बुभूषिष्यते॥ अबुभूषिष्यत॥ अबुभूषि॥

भाव में प्रत्यय होने से प्रथमपुरुष और एकवचन ही होता है। बुभूष्यते पुरुषेण धनिना=पुरुष से धनी होना चाहा जाता है। इत्यादि॥

यङन्त भू-बोभूय्यते॥ बोभूय्येत॥ बोभूय्यताम्॥ अबोभूय्यत॥ बोभूयाञ्चक्रे॥ बोभूयीष्ट॥ बोभूयिता॥ बोभूयिष्यते॥ अबोभूयिष्यत॥ अबोभूयि॥ तत्र मया, त्वया, तेन वा बोभूय्यते=वहां मुझ से, तुझ से, वा उस से अत्यन्त हुवा जाता है॥ इत्यादि॥

ष्टु (ञ्) धातु=स्तुति करना

स्तूयते स्तूयेते स्तूयन्ते। स्तूयसे इत्यादि॥ स्तूयेत॥ स्तूयताम्॥ अस्तूयत॥ तुष्टुवे॥ स्तोषीष्ट, स्तोषीष्ट॥ स्तोषिता, स्तोता॥ स्तोष्यते, स्तोष्यते॥ अस्तोषिष्यत, अस्तोष्यत॥ अस्तोषि। अस्तोषाताम्, अस्तोषिषाताम्। अस्तोषिषत, अस्तोषत इत्यादि॥

स्तूयसे त्वं मया=तू मुझ से स्तुत किया जाता है। स्तूयेऽहं संसारेण=मैं संसार से स्तुत किया जाता हूं। स्तूयसे मया जगदीश्वरः=परमेश्वर मुझ से स्तुत किया जाता है। इत्यादि॥

ऋ=गति

अर्यते अर्येते अर्यन्ते इत्यादि॥ अर्येत॥ अर्यताम्॥ आर्यत॥ आरे॥ आरिषीष्ट, अर्षीष्ट॥ आरिता, अर्ता॥ आरिष्यते, अर्ष्यते॥ आरिष्यत, आर्ष्यत॥ आरि। आरिषाताम्, आर्षाताम्। इत्यादि॥

अर्यते ग्रामो देवदत्तेन=देवदत्त से ग्राम जाया जाता है॥

स्मृ=स्मरण

स्मर्यते स्मर्येते॥ स्मर्येत॥ स्मर्यताम्॥ अस्मर्यत॥ मस्मरे॥ स्मारिषीष्ट, स्मर्षीष्ट॥ स्मारिता, स्मर्ता इत्यादि॥ स्मर्यते माता पुत्रेण=पुत्र से माता स्मरण की जाती है। इत्यादि॥

स्रंसु=गिरना, चूना, टपकना

स्रस्यते ॥ स्रस्येत ॥ स्रस्यताम् ॥ अस्रस्यत ॥ सस्रंसे ॥ स्रंसिषीष्ट ॥ स्रंसिता ॥ स्रंसिष्यते ॥ अस्रंसिष्यत ॥ अस्रंसि ॥

स्रस्यते जलेन घृतेन वा-घृत वा जल से टपका जाता है इत्यादि ॥

(टु) णदि=समृद्धि, आनन्द

नन्द्यते ॥ नन्द्येत ॥ नन्द्यताम् ॥ अनन्द्यत ॥ ननन्दे ॥ नन्दिषीष्ट इत्यादि ॥ ब्राह्मणेन नन्द्यते=ब्राह्मण से आनन्दित हुवा जाता है इत्यादि ॥

यज-इज्यते इज्येते इज्यन्ते ॥ इज्येत ॥ इज्यताम् ॥ ऐज्यत ॥ ईजे ईजाते ॥ यक्षीष्ट ॥ यष्टा ॥ यक्ष्यते ॥ अयक्ष्यत ॥ अयाजि ॥ इज्यन्ते वास्त्वादयो देवाः होमेन=होम से वास्त्वादि देव पूजे जाते हैं (सुधारे जाते हैं) इत्यादि ॥

तनु=विस्तार

